**Volume: 4** **Issue: 7** **Pages: 39-49**




# वेदान्तकौमुदीग्रन्थे द्वितीयेऽध्याये “जन्माद्यस्य यतः” इत्यस्य सूत्रस्य व्याख्यातुकामेण रामाद्वयाचार्येण ब्रह्म- लक्षणप्रसङ्गस्य पर्य्यालोचनं समीक्षणात्मकमध्ययनञ्च

*1 **हिरण्मयदत्त**

*1 वेद भवनम्, संस्कृत विभाग, रवीन्द्र भारती विश्वविद्यालय, पश्चिम बंगाल, भारत।

**Article Info.**
**E-ISSN: 2583-6528**
**Impact Factor (SJIF): 6.876**
**Peer Reviewed Journal**
**Available online:**
**www.alladvancejournal.com**

**Received:** 18/June/2025
**Accepted:** 15/July/2025

***Corresponding Author**
**हिरण्मयदत्त**
वेद भवनम्, संस्कृत विभाग, रवीन्द्र भारती विश्वविद्यालय, पश्चिम बंगाल, भारत।

**सारांश:**
चतुर्दश ईशवीयाब्दान्तेऽद्वैतवेदान्तेऽव्ययाश्रमशिष्येणाद्वैतपण्डितेन भगवता रामाद्वयाचार्येण वेदान्तकौमुदीनामैकः प्रकरणग्रन्थो विरच्यते ।ग्रन्थोऽयं अथातो ब्रह्मजिज्ञासा,जन्माद्यस्य यतः,शास्त्रयोनित्वात्, तत्तु समन्वयादिति श्रीकृष्णद्वैपायणेन वेदव्यासेन सूत्रितं चतुःसूत्रीमाश्रित्य शारीरकमीमांसाभाष्यस्य विचारशैलीमनुसृत्य विवरणप्रस्थानमवलम्ब्याद्वैतवेदान्तस्य सम्पूर्णमेव तत्वं पर्यालोचितं व्याख्यातं मीमांसीतञ्च ।रामाद्वयाचार्येण तदीयमद्वैततत्वं प्रतिस्थापनार्थं समस्तं द्वैततत्वं निराकरणार्थञ्चास्मिन् ग्रन्थे विमुक्तात्मकृता इष्टसिद्धिः, सुरेश्वराचार्यप्रणीतं बृहदारण्यकवार्त्तिकं, मण्डनमिश्रकृतं बिधिविवेकं, वाचस्पतिमिश्रकृता भामती अत्रभवदीयानाञ्च विचारशैल्योऽनुश्रियन्ते। पुनश्च रामाद्वयाचार्यात् परवर्तिनि कालेऽपि अप्प्यदीक्षितादयोऽद्वैतवादिनस्तदीयेषु स्वस्वग्रन्थेषु वेदान्तकौमुद्याः विचारशैलीमवलम्बायन्ते, यथा च अप्प्यदीक्षितप्रणीते सिद्धान्तलेशसंग्रहे बहुत्र वेदान्तकैमुद्या उक्तयः परिलक्ष्यन्ते। तथा च सप्तदश ईशवीयाब्दे धर्मराजाध्वरीन्द्रेनापि रामाद्वयाचार्यकृतां वेदान्तकौमुदीमाधारीकृत्य नव्यन्यायस्य सूक्ष्मदृष्ट्या वादान्तपरिभाषानामा ग्रन्थो विरचितः ।वेदान्तसमाजे सर्वत्रैव वेदान्तपरिभाषेति ग्रन्थः सर्वैः समाद्रियते ।तथापि तु तस्य मातृस्थानीयो ग्रन्थो वेदान्तकौमुदी इदानीमपि कैश्चिदपि न समीक्ष्यते,एतेन च न विद्यते ग्रन्थस्यास्य किमपि समीक्षणात्मकं संस्करणम् ।केवलन्तु स्वामिसुब्रह्मण्यशास्त्रिमहोदयेन १९५५ ईशवीयाब्दे मद्रराजविश्वविद्यालयतः एकामेव मातृकामाश्रित्य वेदान्तकौमुद्याः संस्करणमेकं प्रकाशितम्। एकामेव मातृकामाश्रितत्वात् तस्मिन् ग्रन्थे बहुत्रासम्पूर्णाः पाठाः विराजन्त इत्येवं स्थिते ग्रन्थस्यास्य समीक्षितेन पाठेन प्रयोजनमपरिहार्यते। मदीयेऽस्मिन् शोधपत्रे वेदान्तकौमुदी इत्यस्य ग्रन्थस्य प्रयोजनं पर्यालोच्य तत्रस्थस्य ब्रह्मलक्षणं यथा विचार्यते तथैव समीक्षितेनाध्ययनेन सह प्रदीयते ।

**मुख्य शब्द:** रामाद्वयाचार्यः, वेदान्तकौमुदी, अद्वैतत्वम्, ब्रह्मलक्षणम्, तटस्थलक्षणम्, स्वरूपलक्षणम्

## प्रस्तावना:

अव्ययाश्रमशिष्येण रामाद्वयाचार्य्येण विरचिते वेदान्तकौमुदीनाम्नि ग्रन्थे वादारायणवेदव्यासप्रणीतस्य ब्रह्मसूत्रान्तर्गतस्य अथातो ब्रह्मजिज्ञासा, जन्माद्यस्य यतः, शास्त्रयोनित्वात्, तत्तु समन्वयादित्येतेषां चतुर्णां सूत्राणां सुसम्पन्नं विशदं व्याख्यानात्मकमालोचनं परिलक्ष्यते। भगवच्छङ्कराचार्य्येण शारीरकमीमांसाभाष्यप्रणयनात् परं रामानुजमाध्वनिम्वार्क-भास्करवलदेवविद्याभूषणादयो केऽपि भाष्यकाराः शारीरकमीमांसां नाङ्गीक्रियन्ते, तदर्थमद्वैतवेदान्तसिद्धान्ते परस्परविरोधिन्यो बह्व्य आपत्तयः संसृज्यन्ते। तासामापत्तीनां निरसनमूलकग्रन्थेषु वेदान्तकौमुदीनामा ग्रन्थो विशिष्टं स्थानं लभते। ग्रन्थोऽयं चतुर्णामेव ब्रह्मसूत्राणां शारीरकमीमांसाभाष्यस्य विवरणप्रस्थानस्थां विचारशैलीमनुसृत्य सुविस्तृतेन सुविशदेन च पर्यालोचनेन तथा व्याख्यानेन वेदान्तस्य परमं तत्त्वं सम्पूरयति। शास्त्रकाराणां विचारतोऽयं प्रकरणग्रन्थो नाम्ना प्रसिद्ध्यते। तथा च,

शास्त्रैकदेशसम्बद्धं शास्त्रकार्यान्तरे स्थितम् ।
आहुः प्रकरणं नाम ग्रन्थभेदं विपश्चितः।।

इति आनन्दगिरिर्मन्यते [1] शास्त्रमित्युक्ते सूत्रभाष्यादिकमेव वोध्यते, तेषु च सूत्रभाष्यादिषु विषयाणां परिपूर्णरूपेणानालोचितत्वात् पूर्वपक्षिणां दार्शनिकानां टीकाकाराणाञ्च विविधैः युक्तिजालैः निराकरणत्वात् स्वपक्षसिद्धिरवश्या साध्या। अपि च एकमेव विषयमाश्रित्य विभिधैः टीकाकारै र्व्याख्यातृभि र्वा श्रुत्यादीनां विभिन्नार्थं संगृह्यस्वयुक्तिवलेन च विभिन्नं तत्त्वं समुपजातम्। तान्येव विविधानि तत्त्वान्युल्लेखपूर्व्वकं विविधलौकिकोदाहरणेन च प्रदर्श्य व्याख्याय पुष्टिं विधाय पुनश्च तेषां व्याख्यानानां निराकरणपूर्व्वकं स्वमतप्रतिस्थापणं प्रकरणग्रन्थे दृश्यते, तेन च प्रकरणग्रन्थेन प्रयोजनं साध्यते ।

अप्पयदीक्षितप्रणीते सिद्धान्तलेशसंग्रहग्रन्थे वेदान्तकौमुदीप्रदर्शितः सिद्धान्तोऽनुस्रियते। सिद्धान्तलेशसंग्रहे बहुत्रापि रामाद्वयाचार्य्यकृतं मतं समाद्रियते। ग्रन्थयोः सम्यक् पर्य्यालोचिते कृते परिस्फुट्यते यत्, सिद्धान्तलेशकाराः कौमुदीकारकृतयुक्तिमाश्रित्य स्वकीयाय विचाराय प्रवर्त्तन्ते। [2]

विमुक्तात्मयतिविरचिताया इष्टसिद्धे दार्शनिकमतेनापि रामाद्वयो विशेषभावेन प्रभावितोऽभवत्। वेदान्तकौमुद्यां बहुत्रापि तत्रभवतो विमुक्तात्मनो मतमुल्लिख्यते। एवम्प्रकारायां वेदान्तकौमुद्यां पूर्व्ववर्त्तिनां वैदान्तिकानां चिन्तनछायमिति परिलक्षितत्त्वेऽपि, अत्रभवतो रामाद्वयस्य कृतित्वमवश्यमेव स्वीकार्य्यते यत्, तत्रभवता तदीये वेदान्तकौमुदीति ग्रन्थेऽद्वैतवेदान्तस्य सम्पूर्णमेव तत्वं पर्यालोच्यते। अपि च प्रकाशात्मयतिप्रकटार्थविवरणकाररामाद्वयानां विचारशैलीमनुसृत्य सप्तदशे ईश्वरीयाब्दे धर्म्मराजाध्वरीन्द्रेण वेदान्तपरिभाषेति ग्रन्थं प्रणीत्य नव्यन्यायप्रणीतया सूक्ष्मदृष्ट्याद्वैतवेदान्तोक्तस्य प्रमाणतत्त्वस्य सर्वाङ्गसुन्दरं हृदयवेद्यं विवरणमस्मभ्यं प्रदीयते। अतः प्रमाणतत्त्वस्य तमसाच्छन्नपथे रामाद्वयप्रणीता वेदान्तकौमुदी निर्म्मलं ज्योति र्विकीर्णयतीति कोऽप्यस्वीकर्त्तुं न शक्नोति। एतेन ग्रन्थस्यास्य प्रयोजनं गुरुत्वं माहात्म्यञ्चोपलभ्यते।

1. आनन्दगिरिमाण्डुक्यभाष्यटीका
2. लक्षणत्रयमेवेदं ... इति कौमुदीकारयः। सिद्धान्तलेशसंग्रह P.42 (Kum.Edn.)

अद्वैतवेदान्तस्यैतिहासिकदृष्ट्या विषयवस्तुगतदृष्ट्या च ग्रन्थस्य गुरुत्वे प्रयोजनत्वे चापि इदानीमपि यावत् ग्रन्थस्यास्य एकमपि समीक्षणात्मकं संस्करणं न प्रकाशते।

१९६२ ईश्वरीयाब्दे (1st Edition in 1942)आशुतोषभट्टाचार्य्यशास्त्रिप्रणीतो वेदान्तदर्शन-अद्वैतवाद इत्याख्यः कश्चन प्रसिद्धो ग्रन्थो वङ्गभाषया प्रकाशितः। तत्र रामाद्वयाचार्य्यविरचितो वेदान्तदर्शनस्य चतुःसूत्रात्मिकः कश्चन ग्रन्थो विरचित इति ज्ञायते। [3] 'S.N. Dasgupta' इति महोदयेन आंलोभाषया विरचिते 'A History of Sanskrit Literature' इत्यस्मिन् ग्रन्थेऽपि वेदान्तकौमुदीग्रन्थस्य गुरुत्वं प्रयोजनञ्च वर्णितमस्ति। अपि च ग्रन्थस्यास्य भावार्थदीपिकेत्याख्या काचिदप्रकाशिका व्याख्यानात्मिका टीकाप्युपलभ्यते। टीकेयमिदानीमपि ग्रन्थागारसंरक्षिता विराजते। प्रसङ्गेऽस्मिन् इदमपि वक्तुमीर्य्यते यत्, १९५५ इत्यस्मिन् ईशवीयाब्दे तत्रभवता सूब्रह्मण्यशास्त्रिमहाभागेन वेदान्तकौमुदीग्रन्थः मद्रपुरीविश्वविद्यालयात् प्रकाशितः। परन्तु शास्त्रिमहाभागस्य ग्रन्थस्य भूमिकात इदं ज्ञायते यत्, सम्पादकेन सम्पादनकाले केवलं एकैव मातृका संलब्धासीत् –

In editing the Vedānta Koumudi, I made use of the transcript of the work left by the late Dr.T.R.Chintamani of the Sanskrit Department of Madras University, Which Dr.Raghavan, the Head of the Department of Sanskrit, placed at my disposal.The original of this transcript was the one belonging to the Govt. Oriental Manuscripts Library, Madras, described under R.No. 3346 of the Library's Triennial Catalogues and Copied from a palm leaf belonging to Naduvil Matam, Travancore Cochin State. This was the only Manuscript of the whole work available. After the printing was complete I come to know of a fragment of the work containg chapter IV alone deposited in BORI. [4]

3. आशुतोषभट्टाचार्य्यशास्त्री, वेदान्तदर्शन-अद्वैतवादः Kolkata: Calcutta University Publication, 1962, p-430.
4. S. SubrahmanyaŚāstrī, The VedāntaKoumudī of Rāmādvayāchārya, Introduction Page - 6

वस्तुतस्तु इदमप्यत्राबधेयं शास्त्रिचरणै र्वेदान्तकौमुदीग्रन्थस्य मातृकान्तराणि नोपलब्धानि। परन्तु मातृकागारेषु बहुष्वपि वेदान्तकौमुदीग्रन्थस्यानुपलब्धा मातृका अनालोचिता अनधिताश्चादृष्टपूर्वेण विराजन्ते।

तासान्तासां मातृकानामिदानीमध्यनमालोचनञ्चावश्यकम्। ग्रन्थस्य सुष्ठुपाठग्रहणाय यतो हि समुपलब्धानां सर्वासां मातृकाणामध्ययनमन्तरेण समीक्षात्मकमध्ययनं कस्यापि ग्रन्थस्य न कदापि सम्पद्यते। अतएव वेदान्तकौमुदीग्रन्थस्य समीक्षणात्मकमध्ययनमवलम्व्य अत्रभवता रामाद्वयाचार्येण तदीये वेदान्तकौमुदीग्रन्थे ब्रह्मणो लक्षणं यथा येन वा प्रकारेण व्याख्यातम् तथैव च शोधपत्रं प्रकाशयितुकामेण प्रदर्शयितुकामेण मयात्र शोधपत्रे प्रदीयते -

## ब्रह्मलक्षणविचारः

आनन्दज्ञानदेहोऽप्यनुपदममलस्वान्तसंसेवनीयो [5]
यस्य स्वात्संविभज्य [6] स्फुटमिव कमलामालयं मङ्गलानाम् ।
धत्ते वक्षः क्षमायां भ्रममिव विदधत्तार्किकाणां पुमर्थैः [7]
सोऽस्मान् [8] संसारचक्रभ्रमभिदुरदशां [9] लिङ्गतु ग्लानबोधान् [10]।।

अथ "जन्मद्यस्य यतः" इति ब्रह्मणो लक्षणं निरूपणीयम् [11], प्रमाणादिविचारस्य स्वरूपविचारापेक्षत्वात् [12]। अत्र केचित् व्योमादिमहाभूतानां [13] भौतिकानां च ब्रह्माण्डादीनां जन्मान्तगमकहेतुप्रयोजनान्यथानुपपत्त्योर्वक्तुमशक्यत्वादसम्भवि लक्षणमिदमाचक्षते। तथा हि – लक्षणं तावत् प्रसङ्गाप्रसङ्गविग्रहं [14] केवलव्यतिरेकि। अभ्युपगन्तव्याप्यं [15] प्रति (अ)व्याप्येनानिष्टप्रसञ्जनं [16] च प्रसङ्गः। प्रसञ्जनं च स्वीकारार्हताबोधनम् अथ व्याप्तिः [17] अस्ति ह्यप्रसङ्गोऽपि सम्भावनानामतर्को [18] यदि जलं सहकारिभिस्संपत्स्यते [19] तदा मे तृषं [20] शमयिष्यति इति, मैवम् [21]; प्रसञ्जनं च स्वीकारार्हताबोधनम् [22] इत्याह आहार्यारोपरूपतायास्तर्कस्योक्तत्वात् [23]। सम्भावनाया अपि तथात्वात् इतलक्षणस्य तदुपकरणात्वात्, यथा स्वव्याघातकमुत्तरं जातिः इति तात्पर्येण लक्षणं विवक्षन्, प्रयुक्ते हेतौ [24] समीकरणाभिप्रायेण प्रसङ्गो जातिः इत्यवोचत् [25]। कृते हि हेतुप्रसङ्गे स्वव्याघातकत्वस्यावतारयितुं शक्यत्वात्। एवमत्राप्याहार्यारोपसम्पादनार्थं यक्तिञ्चिदुपलक्षणत्वेनोच्यते [26]। अतो न दोषः। तथा च न्यायविदामग्रणीः आचार्यवाचस्पतिः [27] स्मृतिरूप इत्याद्यध्यासलक्षणेऽवभासपदमुद्धृत्य [28], "अवसन्नोऽवमतो वा भासोऽवभासः प्रत्ययान्तरबाधश्चास्यावसादोऽवमानो [29] वा। एतावता मिथ्याज्ञानम् इत्युक्तं भवति। तस्येदमुपव्याख्यानं पूर्वदृष्टेत्यादि" इति विवक्षाविशेषेण व्याचकार ।

5. आनन्दज्ञानदेहोऽप्यनुपदममलस्वान्तसेवनीयो – रमातृकायाम्, आनन्दज्ञानदेहोऽप्यनुपममममलस्वान्तसंसेवनीयो - अग्रन्थे
6. यस्य स्वात्संविभज्य – व,कमातृकाद्वये, यः स्वास्मात्संविभज्य - रमातृकायाम्, यः स्वस्मात्संविभिष्यत् – पमातृकायाम्
7. पुमर्थे – रमातृकायाम्
8. सोऽस्मात् – व,क,रमातृतादिषु
9. संसारचक्रभ्रमचिदुरहशा – रमातृकायाम्
10. ग्लानं बोधान् – रमातृकायाम्, ग्लानबोधात् – व,कमातृकाद्वये
11. निरूपणार्थः - व,कमातृकाद्वये
12. स्वरूपविचारापेक्षत्वात् - व,क,रमातृतादिषु, ब्रह्मविचारपेक्षत्वात्- पमातृकायाम्
13. व्योमादिमाहाभूतानां – रमातृकायाम्
14. प्रसङ्गाप्रसङ्गविग्रहः – व,क,र,पमातृकादिषु
15. केवलव्यतिरेकी - व,क,र,पमातृकादिषु
16. अभ्युपगन्तव्याप्यं – रमातृकायाम्, अभ्युपगतव्याप्यं – अग्रन्थे
17. व्याप्येनानिष्टव्यापकप्रसञ्जनं – पमातृकायाम्, व्याप्येनानिष्टव्यापकं प्रसञ्जनं – रमातृकायाम्
18. अथाव्याप्तिः – पमातृकायाम्, अथ व्याप्तिः – व,क,रमातृकादिषु
19. सम्भावनानामतर्को - व,क,र,पमातृकादिषु, सम्भावना - अग्रन्थे
20. सहकारिभिस्संपश्यते – रमातृकायाम्, सहकारिभिस्संपत्स्यते - अग्रन्थे
21. वृषं – रमातृकायाम्
22. मेदं – रमातृकायाम्
23. स्वीकाराहिताबोधनम् - पमातृकायाम्
24. इत्याहार्यारोपरूपतायास्तर्कस्योक्तत्वात् – पमातृकायाम्, इत्याहार्यामारोपरूप इतायास्तर्कस्योक्तत्वात् - रमातृकायाम्

25. हेतौ – नोपोलभ्यते रमातृकायाम्
26. इत्यवौचत् - पमातृकायाम्
27. यक्तिञ्चिदुपलक्षणत्वेनोच्यते - पमातृकायाम्, यक्तिञ्चिदुपलक्षणत्वेनोचे– अग्रन्थे व,क,रमातृकादिषु च
28. न्यायविदामग्रणी वाचार्यवाचस्पतिः - पमातृकायाम्
29. इत्याध्यासलक्षणेऽवभासपदमुद्धृत्य – रमातृकायाम्

अविज्ञाततत्वेऽर्थे कारणोपपत्तितस्तत्त्वज्ञानार्थमूहस्तर्कः इति च अक्षपादाचार्यः। पुरोवर्तिन्यूर्ध्वे धर्मिणि सामान्यतो ज्ञातेऽविज्ञाततत्वेऽनिर्णीतयथास्वरूपे [30] जिज्ञासा तावद्भवति। ततः संशयः, किमयं स्थाणुः पुरुषो वा इति। तदनन्तरं कारणोपपत्तिसत्वे [31] विपर्ययेऽनिष्टापत्तितो भवितव्यतात्मा [32] भवति प्रत्यय ऊहरूपस्तर्कः – पुरुषेणान्येन [33] भवितव्यम् इति। अनिष्टापत्तिस्तु (सततमिह वा भान्वाह यतिनाजेति [34]) न "शक्यम् तृणमात्रकेणापि [35] स्थातुमत्र किं पुनरियता स्थाणुना" इति। एतच्च सर्वं सम्भावनायां व्यक्तमेव ।

तथा चेत्यं प्रसङ्गात्मनाऽप्रसङ्गात्मना [36] वा इदं ब्रह्म इति व्यवहर्तव्यं जगज्जात्यादिहेतुत्वात् व्यतिरेकेणाविगीतवत्, सजातीयविजातीयाद्यवच्छिन्नम् वा। "सजातीयविजातीयव्यवच्छेदो वा व्यवहारसिद्धिर्वा लक्षण [37] प्रयोजनम्" इति उदयनेनोदीरणात् [38] इत्युक्तौ हेतोरसिद्धत्वात् [39] जगज्जात्यादिकारणत्वाभावप्रसङ्गस्य [40] चेष्टत्वादसम्भवः, तस्यैव च लक्षणत्वात्। अत [41] एव तर्कविशेषा अपि नात्र सावकाशाः।

तथा हि – स्वस्याव्यवहितस्वापेक्षणमात्माश्रयः। अस्य च सम्बन्धद्वारभेदादाभासत्वम् [42], यथा प्रमेयत्वस्यात्मनि [43] वृत्तौ। क्वचिन्नैवमपि- यथाऽनेककालस्थस्य घटस्य पूर्वकालवृत्यात्मन उत्तरकालवृत्तिमात्मनं प्रति कारणत्वे। अन्योन्यस्याव्यवहितान्योन्यापेक्षणमन्योन्याश्रयः [44]। अस्य च [45] व्यक्तिभेदादुद्धारः, यथा ज्ञानेन [46] संस्कारस्य, तेन च ज्ञानस्य जनने। अन्तरितस्यापेक्षितत्वे तदेव द्वयमात्माश्रयोऽन्योन्याश्रयश्च चक्रकम्, अस्यापि व्यक्तिभेदादुद्धारः [47], यथा – बीजेनाङ्कुरः, तेन च स्तम्बः, तेन च बीजम् जन्यत इत्यत्र। विरुद्धसमुच्चयो व्याघातः। अस्य च कालभेदादिनोपाधिनाऽनवकाशः यथा जननादौ। उपपाद्योपपादकप्रवाहोऽनवधिरनवस्था। क्रियायाः [48] परम्परानन्त्यानपेक्षणादस्या उद्धारः। यथा सामग्र्या कार्यजननाय स्वसामग्र्यानन्त्यानपेक्षणे। तामेतामधो [49] धावन्तीमनवस्थामाचक्षते। क्वचिन्नैवमपि- यथा स्वाश्रये भिन्नबुद्धिजननाय स्वगताभिन्नबुद्धिजननायस्वगतेऽभेदानुपजीवनादपि [50] भेदस्यानन्त्यप्राग्लोपादिदोषात् [51] –

प्राग्लोपाविनिगम्यस्वप्रमाणापगमैर्भवेत् ।
अनवस्थितिमास्थातुरचिकित्स्या त्रिदोषता ।।

भिन्ने भेदस्थित्यङ्गीकारे भेदव्यवहाराय [52] पूर्वभेदवैयर्थ्यम् [53]। अनेकभेदानां [54] युगपद्धर्मिसम्बन्धे किम्भेदविशिष्टे किम्भेदस्थितिरनवस्थितिः [55], युगपदनन्तभेदग्राहकाभावाच्च। तामेतामूर्ध्वं [56] धावन्तीमनबस्थामाचक्षते। स्वाभ्युपगतदोषतुल्यता [57] प्रतिबन्दी विशेषादनवकाशोऽस्याः। यथा धूमानुमाने वाविंशत्या [58] प्रतिबन्द्यां तर्कानुकूलत्वाद्विकल्पेनान्वययोग्येनैकस्मिन्नभ्युपगते तदेकदेशान्वयनियमनिर्धारणाशक्यत्वमविनिगमस्सत्प्रतिपक्षहेत्वोरिव [59] निर्धारयितुं शक्यान्वययोः [60] परस्परप्रतिक्षेप एव पर्यवसानात् ।

30. प्रत्ययान्तरबाधश्चास्यादवसादोऽवमानो – रमातृकायाम्
31. ज्ञातेऽविज्ञाते विज्ञातत्वेऽनिर्णीतयथास्वरूपे - रमातृकायाम्
32. कारणोपपत्तितो – प,रमातृकाद्वये, कारणोपपत्तित्वे – व,कमातृकाद्वये
33. विपर्ययेऽनिष्टापत्तितो र्भवति व्यतात्मता - पमातृकायाम्
34. पुरुषेणानेन - प,रमातृकाद्वये, पुरुषेणान्येन - अग्रन्थे व,कमातृकाद्वये च
35. वाहान् वा यतिराजेति -- प,रमातृकाद्वये, वा भान्वाह यतिनाजेति - अग्रन्थे व,कमातृकाद्वये च
36. तृणमात्रकेणापि - व,क,रमातृकादिषु, तृणमात्रेणापि - पमातृकायाम्
37. प्रसङ्गात्मना -नोपोलभ्यते रमातृकायाम्
38. लक्षण ॰ - नोपोलभ्यते पमातृकायाम्
39. उदयनोदीरणात् – प,रमातृकाद्वये
40. हेतौ असिद्धत्वात् - पमातृकायाम्, हेतोरसिद्धत्वात् – व,क,रमातृकादिषु
41. जगज्जात्यादिकारणत्वाभावप्रसङ्गस्य - प,रमातृकाद्वये, जगज्जात्यादिकारणत्वाभावस्य – अग्रन्थे व,कमातृकाद्वये च
42. अत्र – रमातृकायाम्
43. सम्बन्धद्वाराभेदादाभासत्वम् - रमातृकायाम्
44. प्रमेयस्यात्मनि - रमातृकायाम्
45. अन्योन्यस्याव्यवहितान्योन्यापेक्षितत्वऽमन्योन्याश्रयः - पमातृकायाम्, अन्योन्यस्याव्यवहितान्योन्यापेक्षित्वमन्योन्याश्रयः- रमातृकायाम्
46. च – व,क,र,पमातृकादिषु, नोपोलभ्यते अग्रन्थे
47. ज्ञाने - रमातृकायाम्
48. अस्यापि व्यक्तिभेदादुद्धारः - नोपोलभ्यते अग्रन्थे, प,रमातृकाद्वयतः प्राप्यते
49. क्रियायै – व,क,रमातृकादिषु
50. तामेधामधो - पमातृकायाम्
51. स्वगताभिन्नबुद्धिजननायस्वगतेऽभेदानुपजीवनादपि - पमातृकायाम्, स्वगतभेदानुपजीवनादपि - अग्रन्थे
52. भेदस्यानन्त्यप्राग्लौपादिदोषात् - पमातृकायाम्
53. भेदस्थित्यङ्गीकारे र्भेदव्यवहाराय - पमातृकायाम्
54. पूर्वभदे वैयर्थ्यम् - पमातृकायाम्
55. अनन्तभेदानां - रमातृकायाम्
56. किम्भेदास्थितिरित्यविनिगमः - प,रमातृकाद्वये, किम्भेदास्थितिरनवस्थितिः– व,कमातृकाद्वये
57. तामेतामूर्ध्वं - रमातृकायाम् तामेतामूर्ध्व - अग्रन्थे, तामेतामूर्ध्वे – व,कमातृकाद्वये
58. स्वाभ्युपगतदोषतुल्यता - अग्रन्थे व,कमातृकाद्वये च, स्वाभ्युपगते दोषतुल्यता - प,रमातृकाद्वये
59. धूमानुमाने व्युपाधिशंका - पमातृकायाम्, धूमानुमानव्युपाधिशंका - रमातृकायाम्, धूमानुमाने वाविंशक्या – व,कमातृकाद्वये
60. धूमानुमाने वाविंशत्या- अग्रन्थे

ननु अन्यतरमादायाविप्रकृतस्योपपत्तिसम्भवेनाविनिगमस्य [61] दोषत्वमेवानुपपन्नं केवलं पुंसः तत्र यदि संशयस्स्यात् स च किं न स्यात् इति चेत्, न; भावानवबोधात् [62]। प्रमाणासम्भवेन कश्चिदपि [63] (इति) विशेषः [64] कथमभ्युपगन्तुं शक्यो यमादाय [65] वस्तुगत्याऽप्येकस्यान्वयः [66] स्यात्। ननु एवं प्रमाणाभावदोषस्स्यात् [67], नाविनिगम [68] इति चेत्, तस्याविनिगमोन्नेयत्वेनाविनिगमस्यैव [69] प्रथमोपनतस्य उपन्यासौचित्यात्। बाहुल्यदृष्टमपेक्ष्याबाहुल्यदृष्टतया दुर्बलस्यानुपगमार्हता उत्सर्गः। तद्यथा स्वस्थस्य जानतो ज्ञाने [70] प्रामाण्याप्रामाण्य-निर्धारकप्रमाणानुपनिपाताविशेषेऽपि विना बाधकं [71] प्रामाण्यमभ्युपगच्छन्तं प्रति स्यात् न तु(अ)प्रामाण्यम्; यं तर्कमतेनावलम्ब्याहुः –

तस्माद्बोधात्मकत्वेन इत्यादि ।

ननु बलवदेककोटिकसंशयत्वात् उत्सर्गस्य स कथं [72] तर्कः स्यात् इति चेत्, न; उत्सर्गस्य सम्भावनायाश्चार्थ-स्थित्यनुकूलतयाऽवलम्ब्यत्वात्, संशयस्यानेवंभावात् [73] उत्सर्गस्यैककोटियथात्वात् [74]। संशयस्य च [75] कोटिद्वयावगाहित्वम् [76] सुगमासुगमयोरसुगमदुर्बलत्वं कल्पनागौरवं, दृष्टजातीयमपेक्ष्यादृष्टजातीयं दुःखेन प्रतीयते समपेक्ष्य [77] बहु इत्याद्यखिलजनानुभवसिद्धमेतत्; यथा नैयायिकादीन् प्रति क्षित्यादिषु प्रतिकार्यं कर्तृणां भिन्नानामभ्युपगमापादके; यथा च सौगतं प्रति प्रत्येकं कारणानां समर्थानामनेकसमानदेशकालनीलादिव्यक्त्युत्पादापादके [78] च दूषणानुकूलमिदम्। तदेतद्व्यतिरेकेण कल्पनालाघवं साधनानुकूलं समर्थानामनेककल्पनागौरवं समर्थाल्पकल्पनालाघवम् इति चाहुः। प्रामाणिकाव्यवहार्यमसमाधेयजातीयमौचित्यं [79] वैयात्यनामकम्। तस्य भेदाः प्रश्नवैयात्यादयः। प्रश्नविषयमप्रमिण्वति प्रष्टरि प्रश्नानौचित्यं प्रश्नवैयात्यम्। यथा वस्तुनि [80] विधिनिषेधयोः किमिच्छसि इति पृच्छति [81] प्रमाणव्यवहारे [82] सौगते अप्रतिसमाधेयप्रश्नपरम्परायां मौनं वैयात्यम् इत्याहुः [83]।

61. निर्धारयितुमशक्यान्वययोः – प,रमातृकाद्वये
62. अन्यतरमादायापि प्रकृतस्योपपत्तिसम्भवेनाविगमस्य - पमातृकायाम्, अन्यतरमादायापि प्रकृतस्योपप्रतिसम्भवेनाविनिगमस्य - रमातृकायाम्

63. भावनावबोधात् – पमातृकायाम्
64. क्वचिदपि - रमातृकायाम्
65. शेषः - व,कमातृकाद्वये
66. शक्योऽयमादाय - व,कमातृकाद्वये
67. वस्तुगत्याऽप्येकस्यान्वयं - पमातृकायाम्
68. प्रमाणाभाव एव दोषस्स्यात् - प,रमातृकाद्वये
69. नाविगम - प,रमातृकाद्वये
70. तस्याविनिगमात्रेयत्वेनाविनिगमस्यैव - रमातृकायाम्
71. जाग्रतो ज्ञानं प्रति - प,रमातृकाद्वये
72. बाधकम ° - प,रमातृकाद्वये
73. बलवदेककोटिकः संशय एवोत्सर्गस्तकथं- प,रमातृकाद्वये बलवदेककोटिकः संशयत्वात् सर्गं तत्कथं -व,कमातृकाद्वये
74. संशयस्यत्वनेनैवम्भावात् - प,रमातृकाद्वये
75. उत्सर्गस्यैककोटियथानिविष्टत्वात् - प,रमातृकाद्वये
76. च – नोपोलभ्यते अग्रन्थे परमातृकातः समुपलभ्यते
77. कोटिद्वयावगाहित्वात् - प,रमातृकाद्वये
78. सल्पमपेक्ष्य - रमातृकायाम्
79. समर्थानामनेकसमानदेशकालनीलादिव्यत्पादापादके - व,कमातृकाद्वये
80. प्रामाणिकाव्यवहार्यमसमाधेयजातीयमनोचित्यं - प,रमातृकाद्वये
81. अवस्तुनि - रमातृकायाम्
82. पृच्छति – नोपोलभ्यते अग्रन्थे रमातृकातः समुपलभ्यते
83. प्रमाणव्यवहारे – अग्रन्थे, प्रमाणव्यवहारिणं -- प,रमातृकाद्वये, प्रमाणव्यवहारं - व,कमातृकाद्वये

त एते सोद्धारास्तर्का नात्रावसरं लभन्ते; तथा हि – यदि जगज्जात्यादि तत एव तदात्माश्रयः, जन्म नाशतो नाशतश्च [84] जन्म इत्यन्योन्याश्रय [85] इत्यादिप्रकारेणावकाशो वक्तव्यः जन्माद्यभावे च कथं नः स्यात् ।

अथ महाविद्याऽनुमानेन जगदनित्यत्वं साध्यते [86]; तथा हि – केवलान्वयिनि व्यापके प्रवर्तमानो हेतुः पक्षे व्यापकप्रतीत्यपर्यवसानबलादन्वयव्यतिरेकि साध्याभिमतं [87] साधयन् महाविद्या इत्युच्यते। तस्य च महाविद्यात्वमसिद्ध्यादिसकलदोषविरहात् [88]। प्रमेयत्वादीनां [89] निर्णीतापक्षवृत्तित्वेन [90] पक्षधर्मत्वासिद्धेरसम्भवात् केवलान्वयि-साध्याभावाप्रसिद्धौ साध्याभावाधिकरणविवक्षाऽसम्भवेन [91] यस्य कस्यचिदुपाधित्वेनाभिधीयमानस्यावश्यकपक्षेतरत्वदोषग्रस्तत्त्वेन [92] उपाधित्वासिद्धौ [93] व्याप्यत्वासिद्धेरपि निरस्तत्वात्

अथ स्वर्गापूर्वादिकं कस्यचित् प्रत्यक्षम् प्रमेयत्वात् करतलादिवत् इत्यत्र केवलान्वयिन्यप्ययोगिप्रत्यक्षत्वमुपाधिः। तथा च न सर्वज्ञकर्तृशून्यं [94] (स)कार्यम् [95] आकाशवदकार्यत्वप्रसङ्गात् इति [96] केवलव्यतिरेकिण्यपि कर्तृशून्यत्वमुपाधिः, तदसारम्; योगिनमनङ्गीकुर्वतो न तद्व्यवच्छेदायायोगी इति विशेषणम् युक्तम् [97]। यतः प्रत्यक्षत्वस्य साध्यव्याप्तौ सत्यां साधनाव्यापकत्वार्थमेवायोगिविशेषणोपादानात् पक्षेतरता च ।

84. इति चाहुः - प,रमातृकाद्वये
85. नाशश्च- प,रमातृकाद्वये
86. जन्मनश्चेदन्योन्याश्रय - प,रमातृकाद्वये
87. साध्येत - रमातृकायाम्
88. साध्यविशेषं वाह्यभिमतं - प,रमातृकाद्वये
89. महाविद्यात्वमसिद्ध्यत्वादिसकलदोषविरहात्–पमातृकायाम्, महाविद्यात्वमसिद्ध्यति सकलदोषविरहात् - व,कमातृकाद्वये
90. प्रमेयत्वादीना – पमातृकायाम्
91. निर्णीतपक्षवृत्तित्वेन – पमातृकायाम्
92. साध्याभावाधिकरणविपक्षाऽसम्भवेन - प,रमातृकाद्वये
93. कस्यचिदुपाधित्वेनाभिधीयमानस्यावश्यकपक्षेतरत्वदोषग्रहस्तत्त्वेन - व,कमातृकाद्वये
94. उपाधिकत्वानुपपन्नौ - रमातृकायाम्, उपाधित्वानुपपन्नौ – पमातृकायाम्, उपाधित्वासिद्धौ- व,कमातृकाद्वये
95. सर्वज्ञकर्तृकशून्यं – पमातृकायाम्
96. सर्वे कार्यम्– पमातृकायाम्, सर्वं कार्यम्- रमातृकायाम्
97. इत्यत्र – पमातृकायाम्

अथायोगिप्रत्यक्षता [98] चातदपेक्षिता विप्रकर्षोपलक्षणम्, नैवम् साधुः विप्रकृष्टत्वे [99] सति प्रत्यक्षत्वोपाधेः पक्षेतरत्वात् साध्यव्याप्तौ सत्यां साधनव्याप्त्यर्थं [100] विशेषणोपादानात् एतस्यैव च [101] पक्षेतरलक्षणत्वात्। अविप्रकृष्टत्वमेवोपाधिश्चेत्, तस्य विषमव्यापकत्वे यत्पुनर्विप्रकृष्टम्, न तत् कस्यचित् प्रत्यक्षम् इत्युदाहरणाभावात् साध्यव्यापकत्वम् [102]। उपाधेः समव्यापकत्वे चाविप्रकृष्टत्वं विप्रकृष्टाभावत्वमेव [103] चेत्तन्न करतलादौ इति साध्याव्यापकत्वमेव; विप्रकर्षासहत्वं चेत् नित्यानुमेयादौ, तर्हि कालादिविप्रकर्षाभावे तद्भावेऽपि साध्याभावादसाध्यव्यापकत्वम्। विप्रकृष्टान्योन्याभावत्वं चेत् अविप्रकृष्टत्वम्, तर्हि पक्षव्यवच्छेदार्थमेव विशेषणम् ततः पक्षेतरता [104]। अर्थतः नित्यानुमेयेऽन्योन्याभाववत्त्वेऽपि साध्याभावात् न समव्याप्तिश्चेत्, तर्हि तत्तायां [105] कस्यचित्प्रत्यक्षत्वेऽपि विशिष्टोपाध्यभावान्न साध्यव्याप्तिरेव ।

एवं कर्तृशून्यत्वोपाधावपि कर्तृपदस्य पक्षमात्रव्यवच्छेदार्थत्वात् [106] पक्षेतरता दुर्वारा पक्षद्वयेऽपि व्यतिरेकान्वयव्याप्त्योरयोगात् अन्वयव्यतिरेकनियतोपाध्यनुपपत्तेश्च [107]। ततो यक्तिञ्चिदेतत्। केवलान्वयिसाध्याभावाप्रसिद्धत्वेनैव [108] च साध्याभाववन्मात्रवृत्तित्वसाध्याभाववद्वृत्तित्वसाध्याभाव [109] साधकसमानबलसाध्या-भावसाधकाधिकबलरूपाणां विरुद्धत्वानैकान्तिकत्वप्रतिपक्षबाधानामपि अनुपपत्तेः विपक्षाभावेन विपक्षवृत्तित्वाशङ्काऽसम्भवेन [110] तन्निवृत्त्यर्थं तर्काकाङ्क्षाभावेन तर्कविरहादीनामप्यदूषणत्वात् इति। सा चेयं महाविद्या बहुप्रकारा; काचिदन्वयव्यतिरेकिणः पक्षं पक्षीकृत्य प्रवर्तते, काचित् सपक्षम् काचिद्विपक्षम्, काचित् साध्यम्, काचित् साध्याभावम् इति ।

तत्र पृथिव्यादि अनित्यम् कार्यत्वात् कुम्भवत् इत्यन्वयव्यतिरेकिणि महाविद्या – विमतम् स्वस्वेतरवृत्तित्वानधिकरणानित्यनिष्ठाधिकरणम्, मेयत्वात् घटवत्; ये पक्षे तदितरस्मिंश्च [111] वर्तन्ते धर्मा, तेषु पक्षतदितरवृत्तित्वं नाम धर्मः तदत्यन्ताभावश्च स्वस्वेतरवृत्तित्वानाक्रान्तत्वं तद्वांश्च स्वस्वेतरवृत्तित्वानधिकरणम्; स चासावनित्यनिष्ठश्च तेन स्वस्वेतरवृत्तित्वात्यन्ताभाववदनित्यनिष्ठधर्मवान् पक्ष इति प्रतिज्ञार्थः [112]। अयं च प्रमेयत्वादिहेतुः स्वस्वेतरवृत्तित्वानाक्रान्तानित्यनिष्ठधर्मवत्त्वं पक्षे गमयन् अनित्यत्वमन्तर्भाव्य गमयति। न हि पक्षेऽनित्यत्वमनधिगम्य पक्षमात्रनिष्ठस्यानित्यनिष्ठत्वं शक्याधिगमम्। नापि पक्षे पक्षमात्रनिष्ठानित्यनिष्ठधर्मवत्त्वमनधिगम्यपक्ष [113] -तदितरवृत्तित्वानाक्रान्तानित्यनिष्ठधर्मवत्त्वं शक्याधिगमम् [114]; पक्षव्यतिरिक्तमात्रवृत्तिधर्मस्य पक्षे व्याघातेनोपसंहर्तुमशक्यत्वात् [115]। तदिदं व्यापकप्रतीतेरनित्यत्वादिकमनालम्व्यानुत्पत्तिरूपमपर्यवसानमाहुः [116] ।

98. युक्तम् – नोपोलभ्यते अग्रन्थे परमातृकाद्वयतः समुपलभ्यते
99. अथायोगिप्रत्यक्षं वा- प,रमातृकाद्वये
100. अविप्रकृष्टत्वे - प,रमातृकाद्वये
101. साधनाव्याप्त्यर्थं- प,रमातृकाद्वये
102. च – नोपोलभ्यते अग्रन्थे रमातृकातः समुपलभ्यते
103. साध्याव्यापकत्वम् - प,रमातृकाद्वये, साध्यव्यापकत्वम् - व,कमातृकाद्वये
104. विप्रकृष्टाभावत्वमेवेति – पमातृकायाम्
105. पक्षेतरता - रमातृकायाम्
106. तत्रायां - रमातृकायाम्
107. पक्षमात्रे व्यवच्छेदार्थत्वात् - रमातृकायाम्
108. अन्वयव्यतिरेकनियतोपाध्यमनुपपत्तेश्च - रमातृकायाम्
109. केवलान्वयिसाध्याभावप्रसिद्धत्वेनैव - रमातृकायाम्
110. वद्वृत्तित्वसाध्याभाव – नोपोलभ्यते अग्रन्थे व,क,र,पमातृकादितः समुपलभ्यते
111. विपक्षवृत्तित्वशङ्काऽसम्भवेन- प,रमातृकाद्वये
112. तदितरास्मिंश्च - रमातृकायाम्
113. प्रतिज्ञातार्थः- व,कमातृकाद्वये
114. °पक्ष° - नोपोलभ्यते अग्रन्थे परमातृकाद्वयतः समुपलभ्यते
115. शक्याधिगम्यम् - व,कमातृकाद्वये
116. व्याघातेनोपहर्तुमशक्यत्वात् - रमातृकायाम्

इदानीं सपक्षं [117] पक्षीकृत्योच्यते – अयं घट एतद्घटपक्षीकृतपृथिव्याद्यन्यान्यानित्यान्यो मेयत्वात् आकाशवत्। एतद्घटपक्षीकृतपृथिव्याद्योः ये [118] अन्यत्वे तदुभयत्वरहितः [119]

एतद्घटपक्षीकृतपृथिव्याद्यन्यान्यः [120] स चासावनित्यश्च तदन्यत्वाधिकरणम् इत्यर्थः। एतद्घटपक्षीकृतपृथिव्याद्यन्यान्यानित्यान्यत्वं [121] च एतद्घटान्यत्वेन वा स्यात्, पक्षीकृतपृथिव्याद्यन्यत्वेन वा स्यात्। पूर्वस्मिन् व्याघातः, न ह्ययं घट एतस्माद्घटादन्य इति सम्भाव्यते। द्वितीये तु पृथिव्याद्यनित्यत्वसिद्धिः [122], यदि पक्षीकृतं पृथिव्यादि नानित्यम्, कथं पक्षीकृतानित्यान्यत्वं घटे स्यात् [123]।

अथ विपक्षीभूतं [124] ब्रह्म पक्षः एतत्पृथिव्यादीतरानित्यनित्यवृत्तित्वरहितानित्यनिष्ठाधिकरणम् [125] मेयत्वात् घटवत् [126]। अनित्यनिष्ठाधिकरणम् इत्युक्ते प्रमेयत्वादिभिरनित्यनिष्ठैरेतत्पृथिव्यादिनित्यत्वेऽप्युपपद्यमानैरर्थान्तरता [127] स्यात्, तन्निवृत्त्यर्थमेतत्पृथिव्यादीतरानित्यनित्यवृत्तित्वरहितग्रहणम्। एतत्पृथिव्यादीतरानित्यनित्यवृत्तित्वरहितानित्यनिष्ठा [128] धिकरणम् इत्युक्ते नित्यत्वतदवान्तरैः ब्रह्मनिष्ठैरेतत्पृथिव्यादिनित्यत्वेऽप्युपपद्यमानैरर्थान्तरता इत्युक्ते व्याघातः। न हि नित्यनिष्ठत्वरहितो नित्यो ब्रह्मणि वर्तत इति [129] सम्भवति, तन्निवृत्त्यर्थम् एतत्पृथिव्यादीतरानित्यग्रहणम्। यद्यपि ब्रह्मणि नित्यवृत्तित्वरहितो धर्मो व्याहतः, तथाऽप्येतत्पृथिव्यादीनरानित्ये नित्ये च ये वर्तन्ते [130], तेषु यदेतत्पृथिव्यादीतरानित्यनित्यवृत्तित्वं धर्मः तद्रहितो धर्मो ब्रह्मणि न व्याहतः। एतत्पृथिव्यादीतरनित्यवृत्तित्वरहितानित्यनिष्ठाधिकरणम् इत्युक्ते व्याघातः। यस्य कस्यचिदपि ब्रह्मधर्मस्य एतत्पृथिव्यादीतरनित्यब्रह्मनिष्ठत्वेन तद्रहितत्वानुपपत्तेः, तन्निवृत्त्यर्थमनित्यग्रहणम् [131]। एतत्पृथिव्यादीतरनित्यनिष्ठत्वरहितधर्मस्य ब्रह्मणि [132] व्याहतत्वेप्येतत्पृथिव्यादीतरानित्यनिष्ठत्वरहितधर्मस्याव्याहतत्वात् [133]। एतत्पृथिव्यादीतरानित्यनिष्ठस्वरहितानित्यनिष्ठाधिकरणम् [134] इत्युक्ते [135] चाप्रसिद्धविशेषणता। न ह्येतत्पृथिव्यादीतरानित्यत्वसिद्धेः [136] पूर्वम् एतत्पृथिव्यादीतरानित्यनिष्ठत्वरहितस्यानित्यनिष्ठत्वं [137] शक्याधिगमम्, तन्निवृत्तर्थं नित्यपदम् [138]।

117. व्यापकप्रतीतेरनित्यत्वादिकमनालम्ब्यानुत्पत्तिरूपमपर्यवसानमानमाहुः - पमातृकायाम्
118. सपक्षे - पमातृकायाम्
119. एतद्घटपक्षीकृतपृथिव्यादिकयैः - प,रमातृकाद्वये, एतद्घटपक्षीकृतपृथिव्यादीन् यो - व,कमातृकाद्वये, एतद्घटपक्षीकृतपृथिव्याद्योः-अग्रन्थे
120. तदुभयवत्वरहितः - पमातृकायाम्
121. एतद्घटपक्षीकृतं पृथिव्याद्यन्यान्यः - व,कमातृकाद्वये, एतद्घटपक्षीकृतपृथिव्याद्यन्यासः - रमातृकायाम् एतद्घटपक्षीघटपृथिव्याद्यन्योऽन्यः - पमातृकायाम्
122. एतद्घटपक्षीकृतपृथिव्याद्यन्यानित्यान्यत्वं - प,रमातृकाद्वये
123. पृथिव्याद्यनित्यत्वासिद्धिः - रमातृकायाम्
124. घटे स्यादिति - प,रमातृकाद्वये घटेः स्यात्- व,कमातृकाद्वये
125. विपक्षीकृतं - पमातृकायाम् विपक्षीभूतं -व,क,रमातृकादिषु
126. एतत्पृथिव्यादीतरानित्यनित्यवृत्तित्वरहितानिष्ठाधिकरणम् - रमातृकायाम्
127. घटवत् - नोपोलभ्यते अग्रन्थे परमातृकाद्वयतः समुपलभ्यते
128. मेयत्वादिभिरनित्यनिष्ठैरेतत्पृथिव्यादिनित्यत्वेऽप्युपपद्यमानैरर्थान्तरता - प,रमातृकाद्वये
129. °नित्यनिष्ठा°- नोपोलभ्यते अग्रन्थे पमातृकातः समुपलभ्यते
130. वर्तत इति - नोपोलभ्यते अग्रन्थे पमातृकातः समुपलभ्यते
131. ये धर्माः - पमातृकायाम्
132. तन्निवृत्त्यर्थमनित्यग्रहम् - रमातृकायाम्
133. धर्मिणि - पमातृकायाम्
134. व्याहतत्वेप्येतत्पृथिव्यादीतरनित्यनिष्ठत्वरहितधर्मस्याव्याहतत्वात् - पमातृकायाम्
135. एतत्पृथिव्यादीतरनित्यनिष्ठस्वरहितानित्यनिष्ठाधिकरणम् - पमातृकायाम्
136. इत्युक्तं- रमातृकायाम्
137. ह्येतत्पृथिव्याद्यनित्यत्वसिद्धेः - प,रमातृकाद्वये
138. एतत्पृथिव्यादीतरनित्यनिष्ठत्वरहितस्यानित्यनिष्ठत्वं - रमातृकायाम्

एतत्पृथिव्यादीतरानित्यनिष्ठत्वरहितानित्यनिष्ठाप्रसिद्धत्वेऽपि [139] एतत्पृथिव्यादीतरानित्यनित्यनिष्ठत्वरहितानित्यनिष्ठस्यैतत्पृथिव्या [140] रानित्यत्वादेस्सुप्रसिद्धत्वात् एतत्पृथिव्यादीतरानित्यनित्यवृत्तित्वरहितो धर्मः एतत्पृथिव्यादीतरानित्यमात्रवृत्तिर्वा नित्यमात्रवृत्तिर्वा, एतत्पृथिव्याद्येतत्पृथिव्यादीतरानित्यमात्रवृत्तिर्वा [141] एतत्पृथिव्यादिमात्रवृत्तिर्वा, एतत्पृथिव्यादिब्रह्मव्यतिरिक्तनित्यमात्रवृत्तिर्वा, एतत्पृथिव्यादिब्रह्ममात्रवृत्तिर्वा? प्रथमतृतीयचतुर्थ [142] पञ्चमा ब्रह्मणि व्याहताः। द्वितीयस्त्वनित्यनिष्ठग्रहणेन दूरनिरस्तः। षष्ठस्य त्वनित्यनिष्ठत्वम् एतत्पृथिव्याद्यनित्यत्वमन्तर्भाव्यैव सिद्ध्यति ब्रह्मनित्यत्वस्योभयवादिसिद्धत्वात् इति एतत्पृथिव्याद्यनित्यत्वसिद्धिः। अथ साध्यं पक्षीकृत्योच्यते – अनित्यत्वम् अनित्यत्वान्योन्याभावव्यतिरिक्तश्चासौ [143] एतत्पृथिव्यादिनिष्ठात्यन्ताभावप्रतियोगिनिष्ठत्वरहिताधिकरणम् [144] मेयत्वात् घटवत्। अनित्यत्वान्योन्याभावव्यतिरिक्तश्चासावेतत् [145]_ पृथिव्यादिनिष्ठात्यन्ताभावप्रतियोगिनिष्ठत्वम्, तद्रहितश्चान्योन्याभावो वा स्यात्; तस्य स्वातिरिक्तत्वे सति इति विशेषणायोगात्। तत्त्वे सति एतत्पृथिव्यादिनिष्ठान्ताभावप्रतियोगिनिष्ठत्वरहितो वा। आद्यो व्याहतः; न ह्यनित्यत्वमनित्यत्वव्यतिरिक्तम् इति सम्भवति। एतत्पृथिव्यादिनिष्ठात्यन्ताभावप्रतियोगिनिष्ठत्वरहितश्चानित्यत्वे तर्ह्येव स्यात्, यद्यनित्यत्वं एतत्पृथिव्यादिनिष्ठात्वन्ताभावप्रतियोगि न स्यात् इति अनित्यत्वस्यैतत्पृथिव्यादिनिष्ठत्वसिद्धिः [146] अनित्यत्वस्यान्योन्याभावमुपादाय घटे [147] साध्यप्रसिद्धिः।

139. नित्यग्रहणम् - प,रमातृकाद्वये
140. एतत्पृथिव्यादीतरानित्यनिष्ठत्वारहितानित्यनिष्ठाप्रसिद्धत्वेऽपि - व,कमातृकाद्वये
141. एतत्पृथिव्यादीतरानित्यानित्यनिष्ठत्वरहितानित्यनिष्ठस्यैतत्पृथिव्या- व,कमातृकाद्वये
142. एतत्पृथिव्यादौरतत्पृथिव्यादीतरानित्यमात्रवृत्तिर्वा - रमातृकायाम्
143. ° चतुर्थ °- नोपोलभ्यते अग्रन्थे व,क,पमातृकात्रयतः समुपलभ्यते
144. अनित्यत्वान्योन्याभावव्यतिरिक्तश्चासौ - प,रमातृकाद्वये, अग्रन्थे तु - अनित्यत्वान्योन्याभावव्यतिरिक्त
145. एतत्पृथिव्यादिनिष्ठात्यन्ताभावप्रतियोगिनिष्ठत्वरहिताधिकरणम् – व,क,रमातृकादिषु
146. अनित्यत्वान्योन्याभावव्यतिरिक्तैतत् ° - रमातृकायाम्
147. अभिनित्यत्वस्यैतत्पृथिव्यादिनिष्ठत्वसिद्धिः-व,कमातृकाद्वये, अयोगिनस्यादित्यनित्यत्वस्यैतत्पृथिव्यादिनिष्ठत्वसिद्धिः - रमातृकायाम्

अथ साध्याभावपक्षीकारः -

अनित्यत्वात्यन्ताभावोऽनित्यत्वात्यन्ताभावान्योन्याभावव्यतिरिक्ते तस्य पृथिव्यादिनिष्ठाभावप्रतियोगीमेयत्वात् घटवत् [148] अनित्यत्वात्यन्ताभावस्य चान्योन्याभावव्यतिरिक्तोऽभावोऽत्यन्ताभाव एव, तस्य प्राक्प्रध्वंसाभावविरहात् अनित्यत्वात्यन्ताभावस्य चात्यन्ताभावोऽनित्यत्वमेव इति एतत्पृथिव्याद्यनित्यत्वसिद्धिः इति जन्माद्यपि [149] पृथिव्यादेरनित्यभावत्वादेव इति नासम्भवि ब्रह्मणो लक्षणम्।

अत्रोच्यते – किमिदमनित्यत्वं साध्यते प्रध्वंसात्मकं वा अव्यवस्थितस्वरूपत्वम् [150] वा? नाद्यः, लयवादिभिः सर्वथा [151] उच्छेदापरपर्यायप्रध्वंसानुपगमात्। अथ यथा नियोगवादिनां तस्य सदा साध्यत्वाकारानुपरमेऽपि तद्विषयरागादिनिष्पत्त्या [152] प्रेरकत्वाकारोपरमः; अपरथा यागादिनिष्पादकानुपरमप्रसङ्गात् [153], तथा पृथिव्यादेरपि कस्यचिदाकारस्यानित्यत्वमुपरम [154] इति चरमः पक्षः, तर्हि परिणामिनित्यत्ववादिनां [155] तस्य सिद्धत्वेन सिद्धसाधनत्वात्।

अथ नैयायिकप्रक्रियया सर्गध्वंसौ साध्येते। विगीतं [156] जन्म प्रध्वंसवत् [157] सावयवत्वात्, मध्यमपरिमाणत्वात् मेयत्वात् [158], विन्यासविशेषत्वात्, उपलभ्यमानस्पर्शाधिष्ठानत्वात्, एकदेशेनोत्पादध्वंसवत्त्वात् अरणिमथनादग्नेश्चन्द्रकान्ताज्जलस्य चोत्पाददर्शनात् घटादिवत् [159], तदपेशलम्; अवयवसमवायस्य समवायानङ्गीकारवादिनं [160] प्रति सावयवत्वस्यासिद्धत्वात् [161], अवयवारभ्यत्वस्य च साध्याविशिष्टत्वात् अवयवसहभावस्य च देशतो विवक्षायां द्व्यणुकावयवयोः परमाण्वोर्नित्यद्रव्यतया देशाभावेनासिद्धत्वात् [162],

अवयवेभ्योऽन्यत्रावयविनः समवायानङ्गीकाराच्च यथाप्रसिद्धसावयवत्वस्य [163] च पुञ्जवादिनामिवानारम्भेऽपि [164] सम्भवात्, मध्यमपरिमाणस्य च सावयवत्वसिध्यधीनत्वेनासिद्धेः, विन्यासविशेषस्य च विजातीयपरमाणोरिवाधाराधेयभावस्य [165] विनाऽप्यारम्भं सम्बन्धविशेषादुपपत्तेः, उपलभ्यमानस्पर्शाधिष्ठानत्वस्य च द्व्यणुकेष्वभावादसिद्धेः [166] तज्जातीयत्वस्य च परमाणुष्वपि भावेनानैकान्तात् पृथिव्यादेरेकदेशसर्गध्वंसाभ्यां कार्त्स्न्येन तदनुमानं [167] परमाणुरूपपृथिव्यादौ प्रसङ्गादिष्टक्षतिकरम्; अतो नायं हेतुकलापः सर्गध्वंससाधनक्षमः [168] क्षमादेः। एतेन क्षित्यादेः सकर्तृकत्वानुमानमपि पूतिकूश्माण्डीकृतम् [169]। तथा हि प्रयुञ्जते – क्षित्यादिकं सकर्तृकम् कार्यत्वात् कुम्भवत् [170] ।

148. घटादौ - प,रमातृकाद्वये
149. अनित्यत्वात्यन्ताभावोऽनित्यत्वात्यन्ताभावान्योन्याभावव्यतिरिक्ते तस्य पृथिव्यादिनिष्ठाभावप्रतियोगीमेयत्वात् घटवत् - नोपोलभ्यते अग्रन्थे रमातृकातः समुपलभ्यते, अनित्यत्वात्यन्ताभावोऽनित्यत्वात्यन्ताभावान्योन्याभावव्यतिरिक्त एतत्पृथिव्यादिनिष्ठाभावप्रतियोगीमेयत्वात् घटवत् - नोपोलभ्यते अग्रन्थे पमातृकातः समुपलभ्यते
150. जन्मापि - प,रमातृकाद्वये
151. अव्यवस्थितस्वरूपत्वम् – व,क,रमातृकादिषु, अव्यवस्थितस्वरूपत्वम्- प,रमातृकाद्वये
152. सर्वथा – व,क,र,पमातृकादिषु, सर्वत – अग्रन्थे
153. तद्विषययागादिनिष्पत्त्या- रमातृकायाम्
154. यागादिनिष्पादकानुपरमप्रसङ्गात्- व,कमातृकाद्वये यागादिनिष्पादनानुपरमप्रसङ्गात्- रमातृकायाम् यागादिनिष्पादानानुपरमप्रसङ्गात् --पमातृकायाम्
155. कस्यचिदाकारस्यानित्यत्वमुपरम - व,कमातृकाद्वये कस्यचिदाकारस्यानित्यत्वमुपराम- प,रमातृकाद्वये
156. परिणामिनित्यत्ववादिना - रमातृकायाम्
157. विमतं - रमातृकायाम्
158. ध्वंसवत्- प,रमातृकाद्वये, प्रध्वंसवत् - व,कमातृकाद्वये
159. मेयत्वात् - नोपोलभ्यते अग्रन्थे रमातृकातः समुपलभ्यते
160. घटपटादिवत् - प,रमातृकाद्वये
161. समवायानङ्गीकारात् वादिनं --पमातृकायाम्
162. सावयत्वस्यासिद्धत्वात् - व,क,र,पमातृकादिषु, सावयवस्यासिद्धत्वात् – अग्रन्थे, सावयत्वस्यासिद्धत्वात् – मे मतम्
163. देशाभावेन सिद्धत्वात् - पमातृकायाम्, देशाभावेनासिद्धत्वात्- व,क,रमातृकादिषु
164. यथाप्रसिद्धसावयवत्वस्य - व,क,रमातृकादिषु, यथाप्रसिद्धसावयत्वस्य – प,रमातृकाद्वये
165. चुञ्जवादिनामिवानारम्भेऽपि - व,क,रमातृकादिषु, पुञ्जवादिनामिवानारम्भेऽपि - रमातृकायाम्, अग्रन्थे च
166. विजातीयपरमाण्वोरिवाधाराधेयभावस्य - रमातृकायाम्
167. द्व्यणुकेष्वभावादसिद्धिः-पमातृकायाम्, द्व्यणुकेष्वभावादसिद्धेः - व,क,रमातृकादिषु
168. कार्त्स्न्येन तदनुमानं - नोपोलभ्यते अग्रन्थे व,क,र,पमातृकादितः समुपलभ्यते
169. सर्गध्वंससाध्वधनक्षमः- रमातृकायाम्,
170. पूतिकूष्माण्डीकृतम्- प,रमातृकाद्वये, पूतिकूश्माण्डीकृतम् - व,कमातृकाद्वये

ननु [171] कार्यमात्रस्य तद्विशेषस्य वा सर्वज्ञाशरीरिकर्त्रा [172] न क्वापि व्याप्तिरुपलब्धा। अथ कर्तृमात्रेण व्याप्तिरस्ति इत्यनुमानेन कर्तृमात्रसिद्धौ [173] सर्वज्ञत्वादिकं तस्यानुपपत्तिलभ्यम्, तदसुन्दरम्; कतिपयपरिचयमात्रेणापि कर्तृत्वोपलम्भात्। न हि कुम्भकारोऽदृष्टं निमित्तं ज्ञातुमीष्टे। नापि मधुधारणादिप्रयोजनविशेषं [174]; नापि कर्तृपुरुषविशेषम्, नैवम् [175]; विशेषोपपत्तेः। कुलालो हीश्वरपरतन्त्रो यथा कथञ्चित् करोतु नाम। ईश्वरः पुनरीश्वरानवस्थापरिहाराय स्वतन्त्रः सन्नादिसर्गे [176] प्रवर्तमानः कथङ्कारं सेवाफलदानव्यापृतः सार्वभौम इवाविज्ञाय तत्तदुचितं प्रवर्तेत। न च [177] महतः प्रासादादेः कार्यस्य बहुकर्तृकत्वोपलम्भादत्रापि तदापत्तिः, सार्वभौमन्यायेनैकस्यापि सम्भवात्। आदिसर्गे बहूनां शरीरादिरहितानां ज्ञानेच्छायत्नाः [178] कल्पनीया नित्या एव। अतो वरमेकस्यैव [179] तत्कल्पनम्।

अतः कार्यमहत्वस्य बहुकर्तृकत्वेन [180] व्याप्तत्वात् न कल्पनालाघवन्यायावतारः; किन्तु गौरवमेव युक्तम्। तथा – एकस्य शरीरादिरहितस्य नित्यज्ञानेच्छाप्रयत्ना [181] इति परस्यैव कल्पना गरीयसी इति न दूषणावकाशः [182]। न च एवमपि कल्पनालाघवादेकानेककर्तृसन्देहे एकः कर्तोति सम्भावनैव, न [183] निर्णय इति वाच्यम्; उक्तन्यायेन बहुकर्तृकत्वानङ्गीकार्यत्वे [184] तन्निर्णयात् ।

171. कार्यत्वात् कुम्भवत् - नोपोलभ्यते रमातृकायाम्
172. ननु - नोपोलभ्यते रमातृकायाम्
173. सर्वज्ञाशरीरकर्त्रा - व,कमातृकाद्वये
174. कर्तृमात्रासिद्धौ - पमातृकायाम्, कर्तृमात्रसिद्धौ - व,क,रमातृकादिषु
175. मधुधारणातिप्रयोजनविशेषणं- व,कमातृकाद्वये
176. मैवं - रमातृकायाम्
177. सन्नार्घादिसर्गे - व,कमातृकाद्वये
178. च - नोपोलभ्यते रमातृकायाम्
179. ज्ञाने प्रयत्नाः - पमातृकायाम्
180. ततो वरमेकस्यैव – प,रमातृकाद्वये, अतः परमेकस्यैव - व,कमातृकाद्वये
181. बहुकर्तृत्वेन – प,रमातृकाद्वये, बहुकर्तृकत्वेन- व,कमातृकाद्वये
182. नित्यज्ञानेच्छाः प्रयत्ना - व,कमातृकाद्वये
183. दूषणावकाशा- व,कमातृकाद्वये
184. न - नोपोलभ्यते पमातृकायाम्

यदपि यथा पचियोगात् पक्ता तथा कृतियोगात् कर्ता। अतः पक्षधर्मताबलात् कृतिसम्बन्धे [185] सिद्धेऽपि प्रमावत्संबन्धः कथं सिद्ध्यति भ्रान्त्युत्प्रेक्षादिपूर्वककृतिमत्त्वस्य [186] कुलालादावेव बहुलमुपलम्भात् [187] इति; तदप्यसमीक्षिताभिधानम्; भ्रान्त्यादिकारणमधर्माज्ञानरागादिकं क्षित्यादिकर्तुरसंसारित्वेन न सङ्गच्छते यतः नियतयुगधर्मग्रहनक्षत्रसञ्चारादिलिङ्गैरनुमीयमानस्य कर्तुर्ज्योतिश्शास्त्रादिप्रणेतुरिव [188] प्रमावत्तयैव [189] गम्यमानत्वात् अविज्ञातप्रमातृभाववेदनिर्मातृत्वेनापि [190] तस्यानुमानादेव [191]; यच्च तदुपादानसाक्षात्काराधीनं कृत्तिमत्त्वम्, तदनेकान्तम् [192]; अस्मदादीनां शब्दकर्तृत्वेऽपि तदुपादानसाक्षात्कारानभ्युपगमात् [193]। न च तस्यापि पक्षता [194], अनादिप्रसिद्धकर्तृकादन्यत् सकर्तृकम् इत्युदयनेनोद्गारात् [195] इति,

तदप्यलीकम्; विमतं सकर्तृकम् कार्यत्वात् इति सामान्यतो दृष्टाभिप्रायेण उदयनेनोद्गारात्। विशेषविवक्षायां हि यथोक्तसाध्यवतो घटादेरेव दृष्टान्तत्वेन शब्दादेरपि पक्षनिक्षेपात् [196] व्यजनाभिघातात् द्व्यणुकादिप्रक्रमेण [197] पवनस्य, आरणेयस्यारणिमथनात्, पाषाणोत्पाटनादिना शारीरजलस्य जन्मनः प्रसिद्धत्वात् यथैवास्मदादिकर्तृकमेतदनादिपक्षनिक्षिप्तम् [198], तथा शब्दादिकमपि इति सन्तोष्टव्यम्। न च वाच्यम् – तादृशोऽनुपलभ्यमानोऽपि कर्ता यदीष्यते, न [199] तदा नरशिरसि शृङ्गमप्ययोग्यत्वादनुपलभ्यमानमस्त्येव इति प्रसङ्गः स्यात् इति, पिशाचादेरनुपलभ्यमानस्यापि भेदेन सङ्क्रान्तस्यैव कर्त्रन्तरस्य [200] कार्यविशेषेण सत्त्वसम्भवेनाप्रसङ्गात्। अपरथाऽनीश्वरवादिनामपि [201] पिशाचादेरनुपलभ्यमानस्य सत्त्वे नृशृङ्गादेरपि [202] केन वार्येत ? तस्माच्चोद्याभासा [203] अमी। तदेतत् सकर्तृकत्वानुमानं कार्यत्वस्य [204] सावयवत्त्वसम्पाद्यत्वेन तदपाकरणादपाकृतम् ।

185. बहुकर्तृत्वानङ्गीकार्यत्वे सति कार्यत्वेन– प,रमातृकाद्वये, बहुकर्तृकत्वानङ्गीकार्यत्वे- व,कमातृकाद्वये
186. कृतिमत्सम्बन्धे - रमातृकायाम्
187. भ्रान्त्युत्प्रेक्षेतिपूर्वककृतिमत्त्वस्य - व,कमातृकाद्वये, भ्रान्त्युत्प्रेक्षापूर्वककृतिमत्त्वस्य – प,रमातृकाद्वये
188. बहुलमुलम्भात्– प,रमातृकाद्वये, बहुलमुपलम्भात्- व,कमातृकाद्वये
189. ज्योतिश्शास्त्रादिप्रणेतुरिव - रमातृकायाम्
190. प्रमापत्तयैव- व,कमातृकाद्वये, प्रमाव- व,कमातृकाद्वये
191. अवगीतप्रमाणभाववेदनिर्मातृत्वेनापि – प,रमातृकाद्वये, अविज्ञातप्रमातृभाववेदनिर्मातृत्वेनापि - व,कमातृकाद्वये
192. तस्यानुमानादेवम् – प,रमातृकाद्वये, तस्यानुमानादेव- व,कमातृकाद्वये
193. तदनैकान्तम् -पमातृकायाम्, तदनेकान्तम् -व,क,रमातृकादिषु
194. बहूपादानसाक्षात्कारानभ्युपगमात् - रमातृकायाम्
195. तस्य विपक्षता - व,कमातृकाद्वये
196. इत्युदयनोद्गारात् – प,रमातृकाद्वये
197. पक्षविक्षेपात्- रमातृकायाम्, पक्षनिक्षेपात्-व,क,रमातृकादिषु
198. द्व्यणुकादिक्रमेण – प,रमातृकाद्वये, द्व्यणुकादिप्रक्रमेण - व,कमातृकाद्वये
199. यथैवास्मदादिकर्तृकमेतदनादिप्रसिद्धमपि पक्षनिक्षिप्तम् -पमातृकायाम्, यथैवास्मदादिकर्तृकमेतदनादिव्यवहारे प्रसिद्धमपिपक्षनिक्षिप्तम् - रमातृकायाम्

200. न – नोपोलभ्यते अग्रन्थे रमातृकातः समुपलभ्ययते
201. सङ्क्रान्तस्य कर्त्रन्तरस्य – पमातृकायाम्, सङ्क्रान्तस्येव कर्त्रन्तरस्य - व,कमातृकाद्वये, सङ्क्रान्तस्येव कर्त्वन्तरस्य - रमातृकायाम्
202. अपरथाऽनीश्वरवादिनोऽपि –- प,रमातृकाद्वये, अपरथाऽनीश्वरवादिनामपि - व,कमातृकाद्वये
203. नृशृङ्गादेरपि - पमातृकायाम्, नरशृङ्गादेरपि- रमातृकायाम्, नृशङ्गादेरपि - व,कमातृकाद्वये
204. तस्माच्चाद्याभासा - व,कमातृकाद्वये

अथापि अङ्कुरादिकार्यम् उपादानगोचरापरोक्षविज्ञप्तिचिकीर्षाकृतिमज्जन्यम् [205] कार्यत्वादेव कुम्भवत्, ततोऽस्मदादि-विलक्षणकर्तृसिद्धिः, एवमप्यसाधु ।

अस्ति तावत् कर्मणः फलहेतुत्वं प्रसिद्धम्, तन्नाङ्कुराद्युत्पादमन्तरेण [206] सम्भवति। ततः कर्तार एव कर्मद्वारेणाङ्कुरादीनुत्पाद्य तत्फलं सम्पादयन्ति। तेन कार्यत्वमन्यथाऽपि सेत्स्यति इति न विलक्षणकर्तरीदं प्रमाणम् ।

ननु न तावद्धर्माधर्मावङ्कुरोत्पत्तौ व्यापारमर्हतः सुखाद्युत्पत्तावेव तयोर्हेतुभावात् [207]; न हि धर्मादि दृष्टं कारणम्; शास्त्रं तु धर्मादिरर्थादिदिहेतुतामाचष्टे, नाङ्कुरादेर्हेतुताम् [208]। न च अङ्कुराद्युत्पादमन्तरेण [209] सुखादेरपर्यवसानात् तत्रापि धर्मादेर्हेतुत्वकल्पना [210] इति वाच्यम्; कुम्भाद्युत्पत्तावपि तत्प्रसङ्गात्। तथा च कर्तृनियमासिद्धिः। तत्र चातिरिक्तव्यापारकल्पनेऽत्रापि तत्कल्पनम् न्याय्यम् दृष्टानुसारात् ।

तन्न चोपपन्नम्; प्रमाणाभावात्। न ह्यङ्कुरादयोऽस्मदादिव्यापारेणान्वयव्यतिरेकावनुभवन्तोऽनुभूयन्ते शास्त्राच्च [211] न धर्माधर्माभ्यां ऋतेऽन्यं कर्तृगं व्यापारं प्रतिपादयितुमीष्टे। न च अङ्कुरादीनामकर्तृकत्वं न्याय्यम् कार्यत्वव्याघातात्। न चान्यो व्यापारः कर्तृत्वोपयोगी, कृतेरेव तदुपयोगात्। कल्प्यमानाऽपि कर्तृगामिनी कृतिर्न सर्वकर्तृगा कल्प्या, कल्पनागौरवात्; अनुपयोगाच्च। कृतेर्नित्यत्वे जीवव्यतिरिक्तकर्तृसिद्धिः अनित्यत्वेऽपि तथैव, तस्या इच्छापूर्वकत्वात्, इच्छायाश्च ज्ञानपूर्वकत्वात्। न चास्मदादीनामङ्कुराद्युपादानगोचरसाक्षाद्विज्ञानादिकं सम्भवति इति सर्वज्ञकर्तृसिद्धिः इति केचित् प्रगल्भन्ते,

तेऽपि प्रतियन्त्रणीयाः जात्यायुर्भोगाः कर्मविपाक [212] इति शास्त्रात् अङ्कुरादीनां च जीवविशेषाणां स्थावरजातिः कर्महेतुः इति शास्त्रं सिद्धमेव इति शास्त्रं [213] धर्मादीनामङ्कुरादिहेतुत्वं [214] नाचष्ट इति विस्पष्टं वचो वैयात्यमूलमेव। "फलिन्यो [215] न ओषधयः पच्यन्ताम्" "फलिन्यो ह वै तत्रौषधयः [216] पच्यन्ते। यत्रैतेन यज्ञेन यजन्त" इति यजुर्मन्त्रब्राह्मणाभ्यामङ्कुरादेः कर्मकार्यत्वावगमाच्च। धर्मतत्वं [217] च चोदनैकप्रमाणकम्। अपरथा सर्वज्ञाभिमतबुद्धाद्युपदिष्टचैत्यवन्दनादेरपि [218] धर्मकोटित्वमग्निहोत्रादिवत् केन [219] वार्येत। यदीश्वरस्य योगिनां वा धर्मः प्रत्यक्षः कुतस्तदा बुद्धस्य न स्यात् विप्रलम्भार्थमन्यथोपदेशाश्चेत्तर्हि [220] वेदविरुद्धसिद्धान्ताविशेषात् नैयायिकाभिमतेश्वरकल्पनायां न विश्वासलेशः स्यात्, निराकरिष्यते च प्रत्यक्षत्वं धर्मस्य। अतो वेदैकवेद्यस्य धर्मस्य वेदोदितं तत्तदुचितफलजनकत्वं [221] विनापि प्रयत्नान्तरं न विरुद्ध्यते। दृश्यते च विनाऽपि प्रयत्नं निध्यादिप्राप्तिः [222]। कुर्वन्तोऽपि महान्तमुद्योगं दुर्गता एव [223] केचित्। ततो [224] विज्ञायते धर्माधर्मार्थप्रयत्न [225] एव प्रयत्नान्तरनिरपेक्षः शुभाशुभफलहेतुः। एतेन –

तस्माद्दृष्टविरोधेन [226] देवताराधनात्फलम् ।
न त्वपूर्वात्कर्मणो वा केवलात्तद्विरोधतः।।" भा. ३. २. ४१.

205. कार्यस्य– पमातृकायाम्
206. उपादानगोचरापरोक्षविज्ञप्तिचिकीर्णाकृतिमज्जन्यम् – पमातृकायाम्, उपादानगोचरापरोक्षविज्ञप्तिचिकीर्याकृतिमज्जन्यम् - रमातृकायाम्
207. तन्नाङ्कुराद्युत्पादनमन्तरेण - रमातृकायाम्
208. तथाहेतुभावात् - पमातृकायाम्
209. नाङ्कुरादिहेतुताम् - रमातृकायाम्
210. अङ्कुराद्युत्पादनमन्तरेण - रमातृकायाम्
211. धर्मादिर्हेतुकल्पना –- प,रमातृकाद्वये, धर्मादिर्हेतुत्वकल्पना - व,कमातृकाद्वये
212. शास्त्रञ्च - व,क,रमातृकादिषु
213. कर्मविपाका –- प,रमातृकाद्वये, कर्मविपाक - व,कमातृकाद्वये
214. सिद्धिर्भवेति शास्त्रं – रमातृकायाम्
215. धर्मादीनामङ्कुरादिहेतुत्वं - व,कमातृकाद्वये, धर्मादनाङ्कुरादिहेतुतांशास्त्रविदमा–- प,रमातृकाद्वये
216. फलवत्यो – व,क,र,पमातृकादिषु
217. फलवत्यो वै तत्र तु औषधयः –- प,रमातृकाद्वये, फलवत्यो वै तत्रौषधयः- व,कमातृकाद्वये
218. धर्मतत्वं –- प,रमातृकाद्वये, धर्मत्वं- व,कमातृकाद्वये
219. सर्वज्ञाभिमतबुद्धाद्युपदिष्टचैत्यवन्दनादिरपि - पमातृकायाम्
220. तेन -- व,कमातृकाद्वये, केन – रमातृकायाम्
221. विप्रलम्भार्थमन्यथोपदेशश्चेत्तर्हि -अग्रन्थे, विप्रलम्भार्थमन्यथोपदेशाश्चेत्तर्हि – व,क,रमातृकादिषु
222. तत्तद्युचितं फलजनकत्वं - रमातृकायाम्
223. निध्यादिप्राप्तिः - रमातृकायाम्, निधनादिप्राप्तिः – अग्रन्थे
224. एव तावत् - - रमातृकायाम्, एव - व,कमातृकाद्वये, एतावत् - पमातृकायाम्
225. अतो –- प,रमातृकाद्वये ततो-- व,कमातृकाद्वये
226. धर्माधर्मार्थयत्न - रमातृकायाम्

इति आचार्यवाचस्पत्युक्ताभिप्रायः [227], "फलमत उपपत्तेः" इति व्याससूत्रमपि शिथिलीकृतम्। भूपालस्य सेवादिकर्मणा प्रसादनवदग्निहोत्रादिना महेशप्रसादनानुमानस्यावैदिककर्मणाऽपि [228] प्रसादने दृष्टान्तलाभादग्निहोत्रादिना प्रसादननियमासिद्धिप्रसङ्गेन पराहतत्वात्। वसुदान [229] इत्याद्यागमस्य च उपासनार्थगुणारोपपरत्वादग्निहोत्रादिफलदातरि न मानत्वम् येनैतदनुमानम् तदर्थसम्भावकं स्यात्। तथा च सौषुप्तप्राणप्रेरणोपयुक्तः प्रयत्नो जीवस्य ज्ञानेच्छाभ्यामनुत्थापितोऽपि [230] नैयायिकैरङ्गीकृतः। सुकृतादिवासनैव [231] तथा, व्यापकस्य तस्य तत्तदङ्कुराद्यनुकूलः प्रयत्नः किमपि [232] नाङ्गीक्रियते ।

किञ्च, ईश्वरप्रयत्नोऽपि न कुलालादिप्रयत्नतुल्यः, युतायुतकरणशून्यत्वात्तस्य। न चैवं बहुकर्तृगामिनी कृतिः इति कल्पनागौरवम्, साधारणकार्यस्य जीवानां प्रत्येकमदृष्टकल्पनायामिवागौरवात्; अत एव नानुपयोगः। नित्यानां च कृतौ [233] नादृष्टापेक्षापि युक्तिमती [234], ईशस्य परोद्युक्तस्य [235] निर्विषयप्रयत्नासम्भवेन स्वयमेव सर्गादिसम्भवात्। एवं चानवच्छिन्नतया इदानीमिव सर्गप्रलयो स्याताम् नात्यन्तिकौ [236], ज्ञानेच्छयोरपि प्रयत्नप्रवर्तकयोरीशस्यैकरूपत्वात् ।

यदप्याह किरणावलीकारः – "यद्यपि भगवत इच्छा अस्ति इत्येवमाकारैकैव, तथाप्युपाधिभेदात् सञ्जिहीर्षा [237] चिकीर्षा इत्यादिरुच्यते उपाधिरपि कालविशेषो वर्षशतान्तादिशब्दवाच्यः [238], तदुत्पत्तिरेवेच्छाया [239] उत्पत्तिः" इति, तदप्यचारु, उपाध्यनेकाकारत्वस्य भगवदिच्छाया अनेकाकारत्व [240] मन्तरेणासम्भवेन परस्परव्यपेक्षत्वात् [241]। तथा हि – सर्गानुकूलः कालः [242] सर्गेच्छामन्तरेण संहारानुकूलश्च सञ्जिहीर्षामन्तरेण [243] कथमुत्पद्येत [244] उद्वाहादिवाञ्छयैव तदनुकूलकालसाधनदर्शनात ।

227. तस्मादृष्टाविरोधेन- रमातृकायाम्
228. आचार्यवाचस्पत्युक्ताभिप्रायम् - प,रमातृकाद्वये
229. महेशप्रसादनानुमानस्य वैदिककर्मणाऽपि- रमातृकायाम्
230. वसुधा न -- व,कमातृकाद्वये
231. ज्ञानेच्छाभ्यामनुत्थापिते योऽपि- रमातृकायाम्
232. सुकृतादिवशेनैव–- प,रमातृकाद्वये, सुकृतादिवासनैव- व,कमातृकाद्वये
233. किमिति - प,रमातृकाद्वये, किमपि - व,कमातृकाद्वये
234. कृते - रमातृकायाम्
235. युक्तिमता- रमातृकायाम्
236. सरोद्युक्तस्य - प,रमातृकाद्वये, परोद्युक्तस्य- व,कमातृकाद्वये
237. नात्यन्तिको - रमातृकायाम्
238. तथाप्युपाधिभेदा सञ्जहीर्षा - रमातृकायाम्
239. वर्षशतान्तादिशब्दवाच्यदः- रमातृकायाम्
240. तदुत्पत्तिरेव त्विच्छाया – रमातृकायाम्

241. ° स्य भगवदिच्छाया अनेककारत्व°- नोपोलभ्यते अग्रन्थे प,रमातृकाद्वयतः समुपलभ्यते
242. परस्परव्यपेक्षणात् - प,रमातृकाद्वये
243. कालः - नोपोलभ्यते अग्रन्थे प,रमातृकाद्वयतः समुपलभ्यते
244. संहारेच्छामन्तरेण - पमातृकायाम् संहारेण - रमातृकायाम्, सञ्जिहीर्षामन्तरेण- व,कमातृकाद्वये

यदि लब्धवृत्ति प्राण्यदृष्टं भगवदिच्छानियामकं तर्हि, तस्य वृत्तिलाभोऽपि तदधीन इति स एव दोषः। सहकारिलाभ एव वृत्तिलाभः। सहकारि [245] च वर्षशतान्तादिकाल [246] इति ब्रुवतश्चादृष्टवृत्त्या सहकारिकाललाभेनेच्छानियमः, ततः कालनियम इति पूर्वदोष एव। किञ्च अदृष्टस्य भगवदिच्छाकृतिनियामस्याङ्कुराद्युपादाननियामकता केन वार्येत? न चैवम् घटाद्युपादाननियामकताऽपि प्रसज्येत। अथेश्वरवादिनामीश्वरप्रयत्नस्य [247] घटादावङ्कुरादौ च तुल्यत्वेऽपि कुलालादिप्रयत्नावकाशः, तथाऽदृष्टवादिनोऽपि सम्भवात्। इतश्च नात्यन्तिकसर्गप्रलयौ; प्रलये हि चिरकालं भोगो विच्छिद्येत, न च तद्युक्तम्; कर्मवतां युगपद्वृत्तिनिरोधस्याप्रामाणिकत्वात्। तदाहुः भट्टपादाः –

न च कर्मवतां युक्ता स्थितिस्सम्भोगवर्जिता। इति (श्लो. वा. 1. 5. 69)

स्यान्मतम् विवादास्पदानि [248] सर्वप्राणिकर्माणि कदाचिदपर्यायं फलारम्भवैमुख्यभाञ्जि [249] कर्मत्वात् सुषुप्तकर्मवत्, नैतत्; दृष्टान्ते साध्यवैकल्यात्; यस्माज्जात्यायुर्भोगाः कर्मविपाक इति त्रैविद्यवृद्धाः। न खलु जात्यायुषी अनारम्भमाणानि [250] तानि भोगाय [251] कल्पन्ते, तत्र यद्यपि सुप्तकर्माणि न जातिमारभन्ते, नापि भोगम्; तथाऽप्यायुगारभन्तं [252] एव। तथा च श्रुतिः- प्राणेन [253] रक्षन्नवरं कुलायम्" इति। प्राणोऽपि तत्कर्मवशादेव शरीरं परिपालयन् वर्तते स्वप्नसुषुप्तयोः मृतभ्रान्तिपरिहाराय [254] इति सम्प्रदायकर्तृवचनाच्च। अत एतदनवकाशम् [255] यदाहुः- पूर्वारम्भकपरिक्षयादुत्तरारम्भवैमुख्याच्चान्तरालकालः [256] प्रसुप्तिः इति। अतः साध्यविकलो दृष्टान्तः।

यदप्युवाच उदयनः [257] – सुषुप्तवद्वृत्तिनिरोधश्चेत्क्रमेणैव प्रलयः स्यात् इत्याशङ्क्य न च स्वहेतुबलायातैः [258] कारणैः कार्यैर्वा क्रमेण भवितव्यम् अनियतत्वादेव। अतो युगपत्प्रलयः सर्वग्रासोपरागवत् त्रिशेषसन्निपातवद्वा। तथा [259] हि – वातपित्तश्लेष्मणां च यत्प्रकोपप्रशमक्रमाभावेऽप्येकदा [260] सन्निपातः स्यात् तदा देहसंहारः तथा अनिलानलपवनमहार्णवानां [261] सन्निपाते, ब्रह्माण्डदेहप्रलयावस्थायां युगपदेव भोगरहिताश्चेतनाः स्युः इति, तदसारम्; साम्प्रतमिवाहोरात्रस्यानादिकालमहोरात्रपूर्वकत्वानुमानेन प्रलयासम्भवात्।

यदप्यूचे – अहोरात्रमात्रपूर्वकत्वे सिद्धसाधनत्वम्, निरन्तरपूर्वकत्वे [262] चाप्रयोजकत्वम् [263] सर्गानुवृत्तिनिमित्तब्रह्माण्डस्तितिरूपकालोपाधिनिबन्धनत्वात्तस्य, तदभाव एव व्यावृत्तेः इति तदप्यनुचितम् [264]।

245. कथमुत्पद्यते- रमातृकायाम्
247. सहकारी – व,क,र,पमातृकादिषु
248. वर्षशतादिकाल– पमातृकायाम्, वर्षशतान्तादिकाल - रमातृकायाम्
249. यथेश्वरवादिनामीश्वरप्रयत्नस्य-– प,रमातृकाद्वये
250. विवादस्पदानि - रमातृकायाम्
251. फलारम्भवैमुख्यभान्ति- रमातृकायाम्
252. अनारभमाणानि -अग्रन्थे, व,कमातृकाद्वये, अनारम्भमाणानि-– प,रमातृकाद्वये
253. तानि भोगाय-अग्रन्थे, कर्माणि निभोगाय- रमातृकायाम्, निभोगाय - व,कमातृकाद्वये, कर्माणि भोगाय - पमातृकायाम्
254. तथाऽप्यायुगारभन्तं - रमातृकायाम्, तथाऽप्यायुगारभन्तं - अग्रन्थे, व,कमातृकाद्वये
255. प्राणेन- अग्रन्थे, प्रमाणेन - रमातृकायाम्
256. स्वप्नसुषुप्त्योः मृतभ्रान्तिपरिहाराय-– प,रमातृकाद्वये, स्वप्नसुषुप्तोऽमृतभ्रान्तिपरिहाराय - व,कमातृकाद्वये

257. अत एव तदनवकाशम्- पमातृकायाम्
258. पूर्वारम्भकपरिक्षयादुत्तरारम्भवैमुख्याच्चान्तरालकालः-व,क,र,पमातृकादिषु, पूर्वारम्भपरिक्षयादुत्तरारम्भवैमुख्याच्चान्तरालकालः -अग्रन्थे
259. यद्युपवादोदयनः- पमातृकायाम्, यदप्युवादोदयनः- व,कमातृकाद्वये, यदप्युवाचोदयनः - रमातृकायाम्
260. स्वहेतुबलायतैः - व,कमातृकाद्वये
261. यथा - रमातृकायाम्
262. यत्प्रकोपप्रशमक्रमाभावेऽप्येकदा - प,रमातृकाद्वये, य प्रकोपप्रशमक्रमाभावेऽप्येकदा - व,कमातृकाद्वये, प्रकोपप्रशमक्रमाभावेऽप्येकदा-अग्रन्थे
263. अनिलानलपवनमहार्णवानां-अग्रन्थे, कालानलपवनमहार्णवानां- प,रमातृकाद्वये
264. निरन्तरपूर्वकत्वे - प,रमातृकाद्वये, निरन्तपूर्वकत्वे -अग्रन्थे

उदयनस्य उक्तोपाधिव्यावृत्तौ [265] साध्यव्यावृत्तेः [266] प्रलयानङ्गीकारकरणोपन्यासवन्तं प्रत्युदाहर्तुमशक्यत्वेनोपाधेः साध्याव्यापकत्वात्। अथ समव्यापकोऽयमुपाधिः, एवमपि दिनमणिभ्रमणपूर्वकाहोरात्रस्य [267] ब्रह्माण्डस्थितिकालत्वेनैव सम्भवेन साधनव्यापकत्वात्, तथाऽपि सर्गाद्याहोरात्रपक्षीकारादाश्रयासिद्धिः इति चेत्, मैवम्; स्वप्रसिद्धस्वायम्भुवमन्वन्तरादेवाद्याहोरात्रपक्षीकारेणाप्यस्यार्थस्य [268] साधयितुं शक्यत्वात्। ततो न सर्गप्रलयसद्भावः [269], नाप्यनयोः फलमस्ति, देहादिसर्गप्रलयमात्रेणापि कर्मफलभोगसिद्धेः।

अथापि स्यात् [270] क्रीडार्थं स्वातन्त्र्यप्रकटनार्थं वा भगवान् करोति, तर्हि सृष्ट्यन्तरमपि तथैव कुर्यात्। किञ्च [271] कर्मणां वैफल्यम् वैषम्यनैर्घृण्यादिदोषः च [272], अतः कर्मपरतन्त्र एव करोति इति तेषां प्रसुप्तानामुद्बोधकं वक्तव्यम्। तच्चेदीश्वरेच्छा [273], तर्हि सैव कर्मोद्बोधमिव [274] कर्मनिरपेक्षैव [275] सर्वं किमिति न कुर्यात्। तस्याश्च [276] कर्महेतुकत्वे उक्तो दोषः। अथ तस्या निमित्तान्तरं भविष्यति तर्हि तदेव तामिव सर्वं कुर्यात्। तदाहुर्भट्टपादाः –

कर्मणां वाप्यभिव्यक्तौ किन्निमित्तं तदा भवेत् ।
ईश्वरेच्छा यदीष्येत [277] सैव स्याल्लोककारणम् ।।
ईश्वरेच्छावशत्वे [278] च निष्फला कर्मकल्पना ।
यद्वा तस्या निमित्तं यत्तद्भूतानां भविष्यति ।।

इति। भूपालदेरनित्येच्छाया [279] स्सेवादिकर्मजन्यत्वसंभवात् फलदाने प्रवृत्तिहेतुत्वं युक्तम्, न नित्यैकरूपायाः।

265. नापूर्वप्रयोजकत्वम्- रमातृकायाम्
266. इति तदप्यनुचितम् - नोपोलभ्यते अग्रन्थे व,क,प,रमातृकाद्वयतः समुपलभ्यते
267. उक्तौपाधिव्यावृत्तौ- रमातृकायाम्
268. साध्यवृत्तेः - रमातृकायाम्
269. दिनमणिभ्रमणं पूर्वकाहोरात्रस्य - रमातृकायाम्
270. स्वप्रसिद्धस्वायम्भुवमन्वन्तरादेवं राद्याहोरात्रपक्षीकारेणाप्यस्यार्थस्य- प,रमातृकाद्वये
271. सर्गप्रलयौ युक्तौ- प,रमातृकाद्वये
272. स्यात् -नोपोलभ्यते अग्रन्थे, प,रमातृकाद्वयतः समुपलभ्यते
273. तथा च -- प,रमातृकाद्वये
274. च --- प,रमातृकाद्वये
275. तच्चदीश्वरेच्छा- रमातृकायाम्
276. सेवकर्मोद्बोधमिव- रमातृकायाम्
277. कर्मनिरपक्षेव - रमातृकायाम्
278. तथा च - रमातृकायाम्
279. यदीच्छेत- प,रमातृकाद्वये

एतेनाग्निहोत्रादिफलं सम्प्रदानादिविज्ञानवता [280] दीयमानं [281] व्यवहितफलत्वात् सेवादिफलवत् इत्यपास्तम्। न च नित्यत्वे [282] ज्ञानेच्छादौ प्रमाणम्। अथ अयं घट एतज्जनकानित्यज्ञानेतरज्ञानजन्यः जन्यत्वात् [283] पटवत् इतयनुमानात् नित्यज्ञानसिद्धिः [284]। एवमिच्छाप्रयत्नविशेषणात् तयोरपि सिद्धिः इति मतम्, नैतन्मनोहरम्; उक्तविधज्ञानाद्यजन्यादृष्टजन्यत्वेनापि [285] जन्यत्वोपपत्तेरप्रयोजकत्वात्। एतज्जनकानित्यादृष्टेतरादृष्टजन्यत्वानुमानप्रसराच्च [286]।

अथात्मत्वम् नित्यविशेषगुणवन्निष्टं आत्मत्वात् [287] सत्तावत्। न च स्पर्शसहभावित्वमुपाधिः, पृथिवीत्वस्य स्पर्शसहभावित्वेऽपि [288] नित्यविशेषगुणवन्निष्ठत्वाभावेन साध्यासमव्यापकत्वात् विषमव्यापकत्वाङ्गीकारेऽपि यत्र स्पर्शसहभावित्वं नास्ति, नास्ति तत्र विशेषगुणवन्निष्ठत्वम् मनस्त्व इव इति व्यतिरेकव्याप्तौ अनात्मजातित्वस्य उपाधित्वात् सत्तायाप्यलत्वाच्च [289]। न च पृथिवीत्वं नित्यविशेषगुणवन्निष्ठम् परमाणुजातित्वात् सत्तावत् इत्यतिप्रसङ्गः; पराऽस्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया च इत्युनुकूलश्रुतिवदत्र [290] प्रमाणवैधुर्येण पृथिवीविशेषगुणानां पाकजत्वग्राहकप्रमाणविरोधेनानुमानानुत्थानात् [291]। ततो नित्यज्ञानादिसिद्धिः।

नैतच्चतुरश्रम [292]; आत्मत्वं न विशेषगुणवन्निष्ठम् [293] जलाद्यवृत्तित्वात् पृथिवीत्ववत् इति प्रत्यनुमानात् आगमस्य चागमान्तरानुसारेण निर्गुणवस्तुपरस्य वा जीवगतज्ञानात्मकशक्तिपरस्य [294] वाऽत्रौदासीन्यात् ।

अथ पार्थिवद्यणुकादि नित्यविशेषगुणवज्जन्यम् कार्यत्वात् आप्यद्यणुकादिवत् [295]। न च नित्यविशेषगुणसमवायिसिद्ध्यार्थान्तरता [296], पार्थिवाणूनां नित्यविशेषगुणत्वस्य उभयासंवादात् [297]। नैषोऽपि साधुः प्रयोगः; तादृक् समवायिजन्यत्वेन परमाणुजन्यत्वाभावानुमानात् [298]।

अथ वायुत्वं रूपात्यन्ताभावन्नित्यविशेषगुणवन्निष्ठात्यन्ताभावप्रतियोगि द्रव्यत्वव्याप्यजातित्वात् [299] इति प्रयुज्यते [300]। न च वायुनिष्ठात्यन्ताभावप्रतियोगित्वमुपाधिः पक्षेतरत्वात् इति। भवतामीश्वराभिमते वर्तमानात्मत्वेन [301] व्यभिचारान्न तत्प्रयोक्तव्यम्, तत्र द्रव्यत्वव्याप्यजातित्वे सत्यपि [302] यथोक्तसाध्यभावात् [303] ।

280. ईश्वरेच्छावशित्वे - रमातृकायाम्
281. भूपालादेरनित्येच्छाया - व,क,रमातृकादिषु
282. सम्प्रदानोपकरणादिविज्ञानवता - प,रमातृकाद्वये
283. सम्प्रदानादिविज्ञानवत्वाद्दीर्यमानं - व,कमातृकाद्वये
284. नित्यत्वं - व,कमातृकाद्वये
285. एतज्जनकानित्यज्ञानेतरज्ञानजन्यत्वात् - रमातृकायाम्
286. नित्यज्ञानासिद्धिः- पमातृकायाम्
287. उक्तविधज्ञानाद्यन्तरेणापि अदृष्टजन्यत्वेनापि - प,रमातृकाद्वये
288. एतज्जनकात् नित्यादृष्टेतरादृष्टजन्यत्वानुमानप्रसङ्गाच्च - पमातृकायाम्, एतज्जनकानित्यादृष्टेतरादृष्टजन्यत्वेनापि जन्यत्वानुमानप्रसराच्च - रमातृकायाम्
289. नित्यविशेषगुणवन्निष्टत्वात् - व,कमातृकाद्वये, नित्यविशेषगुणवन्निष्टं आत्मजनिः – पमातृकायाम्,
290. नित्यविशेषगुणवन्निष्टं आत्मजातिः- रमातृकायाम् नित्यविशेषगुणवन्निष्टं आत्मत्वात् – अग्रन्थे
291. स्पर्शसहभावित्वेऽपि - प,रमातृकाद्वये, स्पर्शसहभावित्वे– अग्रन्थे
292. उपाधित्वस्योपाधित्वासत्तायाप्यलत्वाच्च- व,कमातृकाद्वये, उपाधित्वात् सत्तायाव्यतिरेकस्थलत्वाच्च- प,रमातृकाद्वये
293. इत्युनुकूलाम्नायवदत्र- प,रमातृकाद्वये
294. पाकजत्वग्राहकत्वप्रमाणविरोधेनानुमानानुत्थानात्– पमातृकायाम्,
295. नैतच्चतुरम् – पमातृकायाम्,
296. नित्यविशेषगुणवन्निष्ठम् - प,रमातृकाद्वये
297. जीवगतज्ञानादिपरिणामशक्तिपरस्य- प,रमातृकाद्वये
298. आप्यद्यणुकादिवत्- व,कमातृकाद्वये
299. नित्यविशेषगुणवत्समवायिसिद्ध्यार्थान्तरता- प,रमातृकाद्वये
300. नित्यविशेषगुणवत्वस्य उभयासंवादात्- प,रमातृकाद्वये
301. समवायिजन्यत्वाभावेन परमाणुवत् जन्यत्वाभावानुमानात्- प,रमातृकाद्वये, समवायिजन्यत्वेन परमाणुवज्जन्यत्वाभावानुमानात् - व,कमातृकाद्वये,समवायिजन्यत्वेन परमाणुजन्यत्वाभावानुमानात् – अग्रन्थे
302. द्रव्यत्वव्याप्यजातित्वात् पृथिवीत्ववत् - प,रमातृकाद्वये
303. प्रयुज्ञते -रमातृकायाम्

यच्चेश्वरज्ञानं [304] नित्यम् द्विष्ठव्यतिरेके [305] सति ईश्वरनिष्ठत्वात् तन्महत्ववत् न चैवं जीवज्ञानमपि नित्यम् द्विष्टव्यतिरेके सति जीवनिष्टत्वात् [306] तन्महत्ववत् इति अतिप्रसङ्गः, जीवज्ञानस्यानित्यत्वग्राहकविरोधात्। तच्च न [307], ईश्वरस्य स्वनिष्ठप्रत्युत्पन्नघटादिसंयोगाद्याधारत्वधर्मस्य [308] घटादीतरधर्मित्वेन साम्प्रतमेव क्रियमाणनिर्णयव्यावर्तनीयपक्षत्वेन च तन्निष्ठेन व्यभिचारात्। ईश्वरज्ञानेच्छाप्रयत्ना आश्रयव्यापिनो नित्यगुणत्वात् [309] रूपत्वात् [310] रूपवत् इत्यप्रयोगोऽत एव नित्यत्वस्य दुर्वचत्वात्। तस्मान्न नैयायिकप्रक्रिययाऽपि [311] जगज्जन्मादिरिति सुशकम् इति ब्रह्मलक्षणमसम्भवदुष्टम् इति सिद्धम् ।

एवं प्राप्ते सिद्धान्तः [312] – जन्माद्यस्य यत इति ।

304. द्रव्यत्वव्याप्यजातिश्चेत्यपि-रमातृकायाम्
305. युक्ताथोक्तसाध्यभावात् - रमातृकायाम्, यथोक्तसाध्याभावात्- प,रमातृकाद्वये
306. तच्चेश्वरज्ञानं- व,कमातृकाद्वये
307. हीष्ठव्यतिरेके - रमातृकायाम्
308. जीवनिष्टात्वात्- रमातृकायाम्
309. न – नोपोलभ्यते प,रमातृकाद्वये
310. स्वनिष्ठप्रत्युत्पन्नघटादिसंयोगाधारत्वधर्मं प्रति - प,रमातृकाद्वये, स्वनिष्ठप्रत्युत्पन्नघटादिसंयोगाधारत्वधर्मप्र॰- व,कमातृकाद्वये
311. नित्यविशेषगुणत्वात्- प,रमातृकाद्वये
312. रूपत्वात् - व,कमातृकाद्वये

ननु सर्गप्रलयो यतो वा इमानि भूतानि जायन्ते इत्यादिका सर्गप्रलयोपवर्णनमुखेन तद्ब्रह्म तद्विजिज्ञासस्व इति जिज्ञासाकथनपराश्रुतिरेवोपान्यास्तो न हेतुविशेषः श्रुतत्वात् च जन्मादेः श्रौतं जन्मादिकारणत्वं ब्रह्मलक्षणं नासम्भवि पवर्णनमपि [313] दैवपुरुषकारप्रभावप्रदर्शनार्थम् [314]। सर्वे [315] हि तत्प्रभावेन [316] प्रवर्तन्ते [317] तदुपरमे वोपरमन्ति इति भट्टपादैरुक्तत्वात् नैव श्रुत्याऽपि सर्गादिसिद्धिः, इदमसमञ्जसम्; शब्दस्य वह्न्यादाविव [318] स्वार्थबोधनेऽनाधेया शक्तिः इति, औत्पत्तिकस्तु शब्दस्यार्थेन [319] सम्बन्ध इति स्थितत्वात्। यदि पौरुषेयसङ्केताधेया शब्दे शक्तिः, तदा तदाधानात्प्रागबोधकतया शब्दे [320] न सङ्केत एवावतरेत्। अथ सर्गकाले सर्वज्ञेन सङ्केतिताश्शब्दाः अस्मदादीनां व्यवहार्याः। न च आद्यसङ्केतकरणमपि "इदं नामास्य" इति इदमा निर्दिश्यैव इति स्वाभाविकत्वासिद्धिः [321] प्रमाणान्तरसिद्धे सामान्यविशेषशब्दयोः सङ्केतात् प्रथमव्युत्पत्तौ; अतस्सङ्केताधीन एव शक्तिरस्य इत्यादिसामान्यशब्देऽपीष्टादिशब्द [322] इव, मैवम्; प्रतिशब्दं [323] प्रयोगकल्पनस्य [324] वाचकशक्त्यालोचनपूर्वकत्वाभावे [325] प्रमात्वाद्यविशेषापातात् [326] ।प्रतिशव्दं तथा [327] सङ्केते च द्रव्यगुणकर्मादिशब्दार्थाव्यवस्थितत्वापत्याः [328] बहुकल्पनाप्रसङ्गात्। ततः [329] पूर्वपूर्वकल्पप्रयोगानुस्मरणेन [330] भगवानपि प्रयोगान् कल्पयति इति न तेनाप्याधेया शब्दे शक्तिः; ततः पुरुषबुद्ध्यपेक्षाभावादपौरूषेयत्वे संबन्धस्यानपेक्षतालक्षणं शब्दस्य प्रामाण्यं स्थितम्। औत्पत्तिकं [331] च शब्दस्य विवक्षितार्थत्वम्। क्वचितु प्रमाणान्तरविरोधादविवक्षितार्थत्वमपवादः [332],न च वेदस्याप्यध्यायनविधिवलाद्विवक्षितार्थेन अध्ययनविधिवाक्यस्येव वस्त्वार्थवोधकत्वमात्रेण विवक्षितार्थत्वोपपत्तेः तस्या च सर्गादिवाक्यस्यापि स्वार्थवोधकत्वाद्विवक्षितातार्थत्वे सर्गादिः सिद्धेत् न चाकाशादिसर्गप्रलयोः प्रयोजनाभावाः [333] अङ्कुरादीनामिव तेषामपि जीवविशेषाधिष्ठितत्वेन भोगोपयोगिभावसम्भवात्। अन्यथा मनुष्यादिशरीरादिष्वेव [334] कर्मानुसारेण सञ्चारोपपत्तौ तत्सर्गादिकमपि न स्यात्। एतत्स्थूलशरीरमात्मन इति पञ्चीकरणप्रकरणे भाष्यकारवचनाच्च, कर्मविपाकस्मृतेश्च –

ब्रह्मा विश्वसृजो धर्मो महानव्यक्तमेव च ।
उत्तमां सात्विकीमेतां गतिमाहुर्मनीषिणः।।

313. नैयायिकप्रक्रियाऽपि- प,रमातृकाद्वये
314. अत्र राद्धान्तः- पमातृकायाम्, श्रीः अत्र राद्धान्तः- रमातृकायाम्
315. इति जिज्ञासाकथनपराश्रुतिरेवोपान्यास्तो न हेतुविशेषः श्रुतत्वात् च जन्मादेः श्रौतं जन्मादिकारणत्वं ब्रह्मलक्षणं नासम्भवि ननु सर्गप्रलयोपवर्णनमपि – नोपोलभ्यते अग्रन्थे प,रमातृकातः समुपलभ्यते
316. दैवपुरुषकारप्रभावप्रविभागदर्शनार्थम् - प,रमातृकाद्वये
317. सर्वत्र - प,रमातृकाद्वये

318. तद्वलेन न - रमातृकायाम्
319. प्रवर्तते - रमातृकायाम्
320. चक्षुरादीनामिव - प,रमातृकाद्वये
321. शब्दास्यार्थेन - अग्रन्थे शब्दस्यार्थेन – व,क,रमातृकादिषु
322. तदाधानात्प्रागबोधकतया शब्दे - अग्रन्थे, तदातधानात्प्रागबोधकत्वाविशेषान्न - रमातृकायाम्,तदाधानात्प्रागबोधकत्वाविशेषान्न- पमातृकायाम्
323. स्वाभाविकशक्तिसिद्धिः- प,रमातृकाद्वये
324. इत्यादिसामान्यशब्देऽपीच्छादिशब्द- रमातृकायाम्
325. भगवतोऽपि- प,रमातृकाद्वये
326. प्रयोगकल्पनस्या° – व,क,रमातृकादिषु
327. वाचकशक्त्यालोचनं पूर्वकत्वाभावे- रमातृकायाम्
328. प्रमात्वाद्यविशेषापातात् -अग्रन्थे, व,कमातृकाद्वये, प्रमात्ताद्यविशेषापातात् - प,रमातृकाद्वये
329. प्रतिकल्पमन्यथा- प,रमातृकाद्वये
330. द्रव्यगुणकर्मादिशब्दार्थाव्यवस्थितत्वादिविरुद्ध°- प,रमातृकाद्वये
331. ततः - नोपोलभ्यते रमातृकायाम्
332. पूर्वपूर्वकल्पप्रयोगात् तु स्मरणेन - रमातृकायाम्
333. औत्सर्गिकं - प,रमातृकाद्वये, औत्पत्तिकं - अग्रन्थे, व,कमातृकाद्वये
334. प्रमाणान्तरविरोधादपि विवक्षितार्थत्वमपवादः- व,कमातृकाद्वये

इत्यादेरव्याकृताख्यमूलाभिमानपर्यन्तं कर्मफलावगमात् अङ्कुरादीनां रेतोगर्भाद्यभावेऽपि कर्मफलस्थानत्ववत् [335] आकाशादेरपि तथात्वम् [336]। तेषां लीलादेहेन विशेषभोगसम्भवाच्च, पृथिव्यादेर्लीलाविग्रहस्मरणाच्च। न च त्रिवृत्करणादौ विभज्यमानानां पूर्वाधिष्ठातृभिः परित्यागनाशादिव्यवहारः [337], वृक्षादेरर्धावशेषस्यापि जीवनदर्शनाच्च, जलोदरादिवृद्धाविव [338] भूतान्तरागमेऽपि [339] तत्त्वाविघाताच्च [340], भूतेषु कारणदेवताया जीवात्मनाऽनुप्रवेशश्रवणाच्च वृक्षादेः [341] स्वपरकर्मफलोपभोगार्थसर्गादिसम्भवाच्च। शतायुर्वै पुरुष" इति स्थितिकालपरिमाणश्रवणात् तदन्ते प्रलयाच्च सर्गप्रलयसद्भावसिद्धिः [342]। प्रलयकालपरिमाणं तद्विधायकस्मृत्यनुमितश्रुतिप्रमाणकं नापनेयम् [343]। जीवमायाविषयीकृतस्य ब्रह्मणः तत्र विवर्तमानमायाविकारैस्सर्वज्ञत्वादिगुणस्य व्योमादिनिमित्तोपादानभावसम्भवाच्च ।

अथात्माऽविद्याऽव्यक्तादिरूपेण प्रथते तदा ।
तन्निवृत्तौ निवृत्तिः [344] स्यान्निवृत्तिःकेवलात्मना ।।

इति वार्तिकाच्च। इतश्च न सर्गादिप्रयोजनाभावः, इतश्च न सर्गादिप्रयोजनाभावः,विध्यनुसारेण "तं यथायथोपासते [345] तस्याभिध्यानात् तृतीयं विराट् सूत्रात्मापेक्षया विश्वैश्वर्यम् इति च श्रुतेरव्याविकृतेश्वरोपासकस्य [346] तद्भावफलार्थत्वात् [347] अनिर्वाच्यसर्गे प्रयोजनानपेक्षणात् [348]। न च विधौ ब्रह्मणि वा तात्पर्यवत्तां वचसां न देवतादौ प्रामाण्यम्, येन देवो भूत्वा देवानप्येति इति श्रुतिः प्रमाणं स्यात् इति वचनीयम्; सोमेन यजेतेति सोमद्रव्ययुक्तयागविधौ [349] गुणंशे तात्पर्याभावेऽपि प्रामाण्यवदत्राप्युपपत्तेः। महेश्वरचन्द्रयोः [350] प्रसिद्धात् सोमशब्दादन्यत्र [351] एतद्वाक्यात् [352] लताया अप्राप्तत्वात् ।
ननु आम्नाय एव यः पृथिव्यां तिष्ठन् योऽप्सु तिष्ठन् इत्यादिना मृदादेरुपादानादधिष्ठातारं पृथक्करोति; तेन तद्विरुद्धमनुमानम्; नैतत्; मृदादेरपि ब्रह्मोपादानम्; तत्र च [353] दारुणीवाग्निरभिव्यक्तः अन्तर्यामी [354] मायाप्राधान्यादुपादानमव्याकृताकाश इत्यव्याकृतान्तर्यामिभेदस्य मायिकस्याङ्गीकारेणोभयोपपत्तेः [355]। न च ब्रह्म न द्रव्योपादानम् निर्गुणत्वात् गन्धादिवत् इति प्रत्यनुमानम्। केवलस्यानुपादानत्वेन [356] सिद्धसाधनत्वात्; उपाधिशबलस्य [357] गुणकत्त्वादसिद्धश्च हेतुः। परमाणूनामनेकप्रयुक्तसंयोगगुणविशिष्टानां [358] द्रव्यारम्भकत्वस्वीकाराच्च। उपादानस्य तद्रूपेण जगत्कार्येऽन्वयाच्च। न च मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरम्, मयाध्यक्षेण प्रकृतिः सूयते इत्यागमबलान्निमित्तमात्रत्वं [359] ब्रह्मणो मन्तव्यम्। उभयत्वेऽप्येवं निर्देशस्य "तदैक्षत" इत्याद्यनुसारेण सम्भवात्। आकाशादिक्रमेणैव च सर्वत्र सृष्टिरभिप्रेता तेजआदेः [360], प्राथम्यनिर्देशस्तु सर्वकार्याणां साक्षाद्ब्रह्मसृष्टिः इति ख्यापनार्थोऽपूर्वकार्यनिवारणार्थो [361] बहुपुत्रस्य कनीयांसमुद्दिश्य अस्यायं जनकः इतिवत्। तेनैकसर्गरूपसत्कार्येण [362] उक्तरूपकारणत्वलक्षणमविरुद्धम् [363]।

तस्मादसम्भवादिदोषाभावान्निराकुलं तटस्थलक्षणं ब्रह्मणः।।
श्रीः।।श्रीः।।श्रीः।। [364]

335. न च वेदस्याप्यध्ययनविधिवलाद्विवक्षितार्थेन अध्ययनविधिवाक्यस्येव वस्त्वार्थवोधकत्वमात्रेण विवक्षितार्थत्वोपपत्तेः तस्या च सर्गादिवाक्यस्यापि स्वार्थवोधकत्वाद्विवक्षितार्थत्वे सर्गादिः सिद्धेत् न चाकाशादिसर्गप्रलयोः प्रयोजनाभावाः - नोपोलभ्यते अग्रन्थे, प,रमातृकातः समुपलभ्यते
336. मनुष्यादिशरीरेष्वपि स्थितेष्वेव -- प,रमातृकाद्वये
337. कर्मफलस्थानवत्ववत् - रमातृकायाम्
338. तदुपपत्तेः - प,रमातृकाद्वये
339. परित्यागनाशादिव्यवहारप्रसङ्गः- पमातृकायाम्, परित्यागनाशादिव्यवहारवगमेऽपि तत्वावघातप्रसङ्गः - रमातृकायाम्
340. जलादेरादिवृद्धाविव- व,कमातृकाद्वये
341. भूतान्तरभागागमेऽपि- प,रमातृकाद्वये
342. तत्त्वावघाताच्च - रमातृकायाम्
343. वृक्षादिवदेव - पमातृकायाम्
344. सर्गप्रलयप्रवाहसिद्धिः- प,रमातृकाद्वये
345. नापनेयकम्- व,कमातृकाद्वये
346. तन्निवृत्तोऽनिवृत्तिः- रमातृकायाम्
347. यथायथोपसते – अग्रन्थे, यथायथोपासते – व,क,र,पमातृकादिषु
348. श्रुतेरविकृतेश्वरोपासकस्य - अग्रन्थे, श्रुतेरव्याविकृतेश्वरोपासकस्य– व,क,र,पमातृकादिषु
349. तथा भावफलार्थत्वात्- रमातृकायाम्
350. प्रयोजनानिन्वेषणाच्च - प,रमातृकाद्वये
351. सोमद्रव्यं युक्तयागविधौ- रमातृकायाम्
352. लताचन्द्रयोः - प,रमातृकाद्वये
353. सोमशब्दादन्यत – व,क,र,पमातृकादिषु
354. एतद्वाक्यार्थान्वयित्वेन- प,रमातृकाद्वये
355. च - नोपोलभ्यते अग्रन्थे प,रमातृकाद्वयतः समुपलभ्यते
356. दारुणीवाग्निरभिव्यक्तमन्तर्यामी-- प,रमातृकाद्वये
357. मायीकस्याङ्गीकारेणाम्नायोपपत्तेः-- प,रमातृकाद्वये
358. कौवलस्यानुपादानत्वेन– पमातृकायाम्,
359. उपाधिशब्दस्य– रमातृकायाम्
360. परमाणूनामनेकप्रयुक्तं योगगुणविशिष्टानां– रमातृकायाम्
361. इत्याद्यागमबलान्निमित्तमात्रत्वं-- प,रमातृकाद्वये
362. तैजसादेः– रमातृकायाम्
363. ख्यापनार्थो न ततः पूर्वकार्यनिवारणार्थो-- प,रमातृकाद्वये
364. तेनैकरूपसर्गकार्येणैक°-- प,रमातृकाद्वये

अथ स्वरूपलक्षणं संक्षेपेण भण्यते [365] – सत्यं ज्ञानमनन्तमानन्दं ब्रह्म इति च स्वरूपलक्षणम्। तत्र सत्त्वव्यवहारो न तावत् सत्तासमवायोपाधिः; सतादावपि [366] तस्य निर्बधस्य दर्शनात् द्वे तत्त्वे सदसती भावाभावौ इत्यविशेषेण सङ्ग्रहाच्च। सत्त्वं मुक्त्वाऽपि [367] भावत्वं चेत्, षडेव भावा इति व्यपदेशो न स्यात्। अत एवार्थक्रियाप्रमाणयोग्योपाधिरपि न युज्यते, तयोरपि सत्त्वव्यवहारात् तत्र परनिबन्धनत्वेऽनवस्थानात्। अतः स्वरूपसत्त्वमेव [368] सद्यवहारहेतुः। तच्च चिदात्मनो [369] ब्रह्मणः समानः।
तदाहुर्बाचस्पतिमिश्राः – चिदात्मा तु श्रुतिस्मृतीतिहासपुराणगोचरस्तन्मूलतदविरुद्धन्यायनिर्णीतशुद्धबुद्धमुक्तस्वभावः [370] सत्त्वेनैव निर्वाच्यः अबाधितस्वयंप्रकाशतैवास्य [371] सत्ता। सा च स्वरूपमेव चिदात्मनो, न तु तदतिरिक्तसत्तासामान्यसमवायोऽर्थक्रियाकारिता च इति। न च स्वरूपसत्त्वमपि प्रतिभावं भिद्यते। अपरथा केषाञ्चित्सत्त्वे सर्वेषां सत्त्वात् नष्टानष्टोत्पन्नानुत्पन्नविभागो न स्यात्। अतो नाद्वैतसत्त्वसिद्धिः [372] इति वचनीयम् ।

अतीवसंक्षेपेणात्रोपन्यस्तं पत्रसंख्यानिर्दिष्टत्वात् ।

365. रूपसर्गकार्यत्वलक्षणमविरुद्धम्– पमातृकायाम्, रूपकारणत्वलक्षणमविरुद्धम्– रमातृकायाम्
366. श्रीः।।श्रीः।।श्रीः।। - - नोपोलभ्यते अग्रन्थे रमातृकातः समुपलभ्यते
367. उच्यते – रमातृकायाम्
368. सत्तावादावपि– पमातृकायाम्
369. सत्यमुक्त्वाऽपि– रमातृकायाम्
370. स्वरूपमेव– रमातृकायाम्
371. तच्चाचिदात्मनो– पमातृकायाम्
372. श्रुतिस्मृतीतिहासपुराणगोचरणस्तन्मूलस्तदविरुद्धन्यायनिर्णीतशुद्धबुद्धमुक्तस्वभावः– रमातृकायाम्

**References**


1. Śāstrī S. Subrahmanya: Vedānta-Koumudī of Rāmādvayāchārya, 1st Ed. Madrs: Madras University Sanskrit Series No-20, 1955.
2. Bhattāchārya Shāstrī, Asutosh: Vedānta Darśana-Advaitabāda, 2nd Ed. Calcutta: University of Calcutta, 1962 (1st. Ed. In 1942).
3. Bhattāchārya, Panchānana: Vedāntaparibhāṣā of Dharmarājādhvarīndra, 1st ed. Calcutta: Gupta Press, 1961 (1367 Vangābda, soura Pouṣa)
4. Vedānta Kaumudī of Rāmādvayāchārya, MSS. Calcutta: Asiatic Society.
5. Vedānta Kaumudī of Rāmādvayāchārya, MSS. Vārāṇaṣi: BHU.
6. Vedānta Kaumudī of Rāmādvayāchārya, MSS. Kerālā: Kerala University, Oriental Research Institute.
7. N.C.C Vol xxxi of Madras University.
8. Dasgupta, S.N.: History of Sanskrit Literature, 1st Ed. Calcutta: University of Calcutta, 1947, II.
9. Śāstrī, Haraprasad: Descriptive Catalouge, 1st Ed. Kolkata: Asiatic Society, VII.
10. Thangaswami R. Advaita Vedanta Literature A Bibliographical Survey. 1st Ed. Madras: University Madras, 1980.


**Index**

1. रमातृका-The Manuscript Of RORI-Rasasthan Oriental Research Institute, Jodhpur, Rasasthan
2. वमातृका-The Manuscript Of BHU-Banaras Hindu University, Baranasi, U.P
3. कमातृका-The Manuscript Of Kerala University Oriental Research Institute
4. पमातृका-The Manuscript Of RASB-Rayal Asiatic Society of Bengal, Kolkata, Pachim Banga(West Bengal)
5. अग्रन्थ-वेदान्तकौमुदी (Edited by Swami Subrahamanya Sastri, Vulgate Edition)